परहिंसापरद्रव्यपरदारापराङ्मुखः ।
सोऽहमभ्यागतो देवि गङ्गे याहि पवित्रताम् ॥ १४

तदनन्तरं गङ्गया जातपरितोषया कूलंकषकल्लोलमालया सच्छकूर्म्ममीनमकरशिशुमारया प्रवाहपतितोभयतटविटपया मुक्ताहारधवलधारया संप्लावितांगः स कायस्थः आयुषि पूर्णे विधियोगात्तत्रत्तनु स्स्वर्गं नीतवान् तथाविधं भागीरथ्याः करुणापरिणामपरीक्षितचरित्रं चिर मिवाद्यापि तं कायस्थं स्तुवन्ति साधवः। श्लोकस्तु।

वपुर्याति श्रियो यान्ति यान्ति सर्व्वेऽपि बान्धवाः ।
कथासारेहि संसारे कीर्त्तिरेव स्थिरा भवेत् ॥ १५ ॥

इति तात्त्विककथा ।

भाषानुवाद

हरिपद ॥

परहिंसा पर धन परदारा सभसौं चित फराक ।
हेगङ्गा देवि होउ पविता अयलङ्क निकट अहांक ॥१४

चौपाइ ।

इन्दुकुन्द मुक्ता जल धार । काछु मांछ सह २ धरि आर ।
श्रोघ बङ्कत करतत सञ्चार । देखिपड़ गोहि हजार हजार ।
गङ्गा कां मन तोष अपार । चललौ अपनेहि धर्म्म विचार ।
दुहूतटगाछ खसय पड़ड़ाय । पहौ लहर उड़िआय ।
गङ्गाजलभल उठल तरङ्ग । बोधीभक्तक भीजल अङ्ग ॥
विधि योगहि सेश्वागलदेह । स्वर्ग्ग गेला हरिहरपदनेह ॥
अद्यावधि तनिकर यशगान । करथित कथि कति साधुमहान ।
तनधन बान्धव जाथिउदार । थिरतर सुयश रहैसंसार ॥१५

इतितात्विककथा ।

अथ तामसकथा ।

तद्यथा । तत्क्षणस्फूर्त्तिजातेन साहसेन तपश्चरन् ।
तमोगुणेन संयुक्त स्तामसो धार्म्मिको मतः ॥ १ ॥

बभूव राढायां पुरि श्रीकण्ठोनामब्राह्मणः सुषाधिगतसकलशास्त्रो नीतिविद्याविज्ञः सर्व्वकलाकुशलो जन्माभ्यस्तगुणाना मुपयोगार्थं पूजाख्यातिलाभार्थञ्च नाना भूपालदर्शनकुतूहली देशान्तराणि बभ्राम भ्रमंश्चैकदापि सूर्य्यग्रासकाले गङ्गायमुनयो स्सङ्गमे ग्राहेण ग्रस्यमानां गा मेकां प्राणव्ययव्यग्रतया परमकातरां पयसि मज्जन्तीं ददर्श दृष्ट्वापि समुपजातकरुण श्चिन्तयामास । तद्यथा ।

न प्रयागा त्पर न्तीर्थं कालो नार्कग्रहात्परः ।
परप्राणपरित्राणात् परो धर्म्मो न विद्यते ॥ २ ॥

तदिदानीं सर्व्वं समुदित मत्रैव विद्यते तत्करवाणि तावत् ग्राहकवला द्गोरक्षणम् । तथाहि ।

भाषानुवाद ॥

अथतामसकथा ।

चौपाई ।

स्फुर्त्ति जनित साहस नहिछोट । तत्क्षणयुक्त तमोगुणगोट ।
तामसधार्म्मिक जानव नाम । यथोगान तनिकर सब ठाम ॥१

छला राढा पुरीमें श्रीकण्ठ नामक ब्राह्मण सेसकलशास्त्रवेत्ता नीतिविद्यानिपुणपुन सकल कला परिपुर्ण ओ गुणविख्यातार्थ उपयोगार्थ पूजार्थ लाभार्थ नानादेशदर्शन कुतूहली देशान्तर भ्रमणकरयित एकदा सूर्य्यग्रहणकाल गङ्गायमुनाक सङ्गममें ग्राहसों ग्रस्ता गाय प्राण घात व्यग्रतासों अतिकातरा जलमें मग्ना देखल दुःखिप्राप्त करुण चिन्ता करयित भेला ।

शोरठा ।

सूर्य्य ग्रहण सनकाल तीर्थन आन प्रयागसन ।
धर्म्म किश्रान विशाल परक प्राण रक्षाकसन ॥२

तैं एहि समय सकल समुदित एहि स्थल विद्यमान तैं हेतु करब तावत् ग्राह बलाता गोरक्षा हेतु ।

नश्वरेण शरीरेण पुण्यराशिः स्थिरस्थिरः ।
कार्य्यं साधु रकाण्डेन लप्स्यमान मुपेक्षते ॥ ३ ॥

किञ्च परामर्शोऽयं समयक्षेप न सहते कालक्षयताहि क्रियाफल न जनयति किञ्च परीतापाय भवति इति चिन्तयन् स ब्राह्मणः पयसि झम्पं कृत्वा धर्म्मं श्रद्धया जीर्णं तृणाय मन्यमानः खनित्रेण ग्राहमुख माजघान ग्राहस्तु खनित्रघाताकुलित स्तदामिषलुब्धस्तगा मर्द्धक वलितां परित्यज्य ब्राह्मणं कवलयञ्चकार गौरपि ग्राहपरिमुक्ता वेगेन पलायिता । स्वकुलं प्राप्य सुखिनी बभूव । तथाहि

नीत्यापि नयतः काल मापदाकाङ्क्षिकी भवेत्
विमुक्त स्तापद स्तस्मा मोदते लब्धसिद्धिवत् । ४

भाषानुवाद ॥

दोहा

पुण्यराशि सो स्थिररहत नष्टअनित्य शरीर ।
लाभ अकाल में पुण्यसे त्याग साधु केधीर ॥३

किंच विचार थिक एहन कालक्षेप नहि कर्त्तव्य समय गतभेला क्रिया निस्फला किन्तु परितापकारिणी होइछ ई चिन्ता करयित से ब्राह्मण जलमें झंप कय धर्म्म मुखासौं जीवकों तृणसमान मानि खनती लय ग्राहक मुख तकाय मारल ग्राह से घात सौं आकुल पुन तनिक मांसक लोभसौं अर्द्धगिलिता गायकों परित्याग कय ब्राह्मण कों कवलित कयल गाए ग्राह मुखसौं छूटि अतिवेग सौं पड़ायलीह ।

सोरठा ॥

नीतिहि काल विताव आपत आकस्मिक पड़य ।
लब्धसिद्धि सुख पाव से आपद सौं छूटि पड़य ॥ ४

ब्राह्मणस्य स्वप्राणपरिवर्त्तेन कृतगोरक्षणस्य शिरसि पुष्पवृष्टिः पपात स्वर्गवासो बभूव यश श्चाद्यापि गीयते ।

चिरकालप्रवासेन वीरः प्राप्नोति तत्पदम् ।
तत्पदं शीघ्र कारित्वा त्साहसो लभते क्षणात् । ५

इति तामसकथा ।

अथानुशयिकथा तद्यथा ॥

पापं कृत्वा तु तापेन पुनः पापपराङ्मुखः ।
तपश्चरति यः पश्चा द्धार्म्मिकोऽनुशयीभवेत् ॥ १

अस्ति भागीरथीतीरे कम्पिलानामनगरी तत्र हेमाङ्गदो नामराजा तस्मिन्नुपरते मन्त्रिणस्तस्य पुत्रं रत्नाङ्गदनामानं कुमारं राजान श्चक्रिरे सच राज्य म्प्राप्य पितृवित्तेन दर्प्पितो यौवनमदा च्चान्यायप्रवृत्तो बभूव तथाहि ॥

भाषानुवाद ॥

अपन प्राणक बदला सौं गो रक्षाक पुरुषसौं ब्राह्मणक माँथ ऊपर पुष्पवृष्टि भेलि स्वर्गवास पयोलनि यशोगान अद्यावधि तनिक होइछ ॥

दोहा ।

चिर प्रवाससौं वीर कां जे पद ईश्वर देथि ।
से शीघ्रता सुकर्म्मसौं क्षण मे साहसिलेथि ॥ ५

इतितामसकथा ॥

अथ अनुशयि कथा ।

चौपाई ।

पाप कयल पुन तापहि त्याग बहुत तपस्या मेँ मनलाग ।
धार्म्मिकसे अनुशयी कहाव पाप दोष तनि निकट न आव ॥ १

छथि गङ्गा तीर मेँ कम्पिला नाम नगरी ततय हेमाङ्गद नामक राजा छलाह से स्वर्ग प्राप्तभेला मन्त्रिलोक तनि राजाक पुत्र रत्नाङ्गद नाम कुमार कां राजा कयल सेपुन राज्य पावि पितृ धन सौं गर्व्वित औ यौवनमद सौं अन्याय प्रवृत्ति हो इत भेलाह ॥

अनुरूपेण पुत्रेण राज्य न्तिष्ठति सीमनि ॥
पूजितं पूजितेन स्वाद्विरूपेण विनश्यति ॥ २

अपिच ॥ परिप्राप्तेषु वित्तेषु प्रादुर्भूतेषु यौवने ॥
परीक्षितासु विद्यासु मदः कस्य न जायते ॥ ३

सएव पुरुषः श्रेष्ठः पूज्यो भवति तद्विदाम् ।
धनयौवनविद्याभि र्गर्व्वस्नाङ्गीकरोतियः ॥ ४

अन्यच्च । धने येन जितो गर्व्वो यौवने मन्मथो जितः ।
तेन मानुषसिंहेन जितं किन्न महीतले ॥ ५ ॥

अपरञ्च । कुलभ्रष्टासु नारीषु धर्म्मभ्रष्टे महीभुजि ।
किन्नैव जायते पाप मुच्छृङ्खल इव द्विपे ॥ ६ ॥

ततस्स राजा धनिनां धनं कुलीनानां स्त्रियं हरंस्तल्लोभेन निराग सा मपि प्राणहारकः । प्रजानां पीडाकरो बभूव । तत स्सर्व्वै रालोचितं यदयं राजा न भवति किन्तु दस्युः । यतः

भाषानुवाद ॥

चौपाई ॥

पुत्र होथि जौं पिता समान राज्य रहै तौं धर्म्मसिमान ।
जौं विरूप नृप बेटा प्राप्त तौं जानब भेल राज्य समाप्त ॥ २ ॥
विद्याभ्यास कला निष्णात राजकुमार भुवन विख्यात ।
धन पायोल यौवन तन जाग के जन जनि मद मद नहिलाग ॥ ३
विद्या यौवन धन मद पाय से नृप कैन करथि धन्याय ।
यौवन धन विद्या कां धरथि धन्य पुरुष जे गर्व्वन करथि ॥

दोहा ॥

यति धन जीतल गर्व्व जे यौवन जीतल काम ।
जितल सकल कह्न कौन से पुरुषसिंह तननाम ॥ ५ ॥
कुल भ्रष्टा जौं नारि हो धर्म्मक भ्रष्ट नरेन्द्र ।
कौन पाप संप्राप्त जनु मातल फुजल गजेन्द्र ॥ ६ ॥

ततय से राजा धनिक धन कुलीनक स्त्री हरथि ताहि लोभें निरपराध लोकक प्राण लेथि प्रजाक पीड़ाकर्त्ता भेलाह तत सब विचारल जे ई राजा नहि थिकथि किन्तु डाकू हेतु ॥

लंघमानः *श्रुतं दर्प्पा न्मदान्धइव कुञ्जरः ।
राजधर्म्मं च्युतो राजा दस्यु रेव न संशयः ॥ ७ ॥

यद्ययमनेनापराधेन द्रुह्यते तदा स्वामिद्रोहरूपं पापं यदि रुह्यते तदा विनाशः तदस्मै मुनीनां द्वारा धर्म्मोपदेशः कारयितव्यो भवति ततस्तैः सचिवै राहूता मुनयः । मुनिभिरुक्तम् ।

धर्म्मं मर्ज्जय राजेन्द्र धर्म्मो राज्यस्य कारणम् ।
कथ मन्ये नरा सर्व्वे नरदेवः कथं भवान् ॥ ८ ॥

पूर्व्वजन्मनि भवता पुण्यं कृतं तत्फल मकण्टकं राज्यं लब्धवानसि तदस्मि न्नपि जन्मनि पापे *निवृत्तरूपं पुण्यं कुरु। राजोवाच। किन्नाम पुण्यं । मुनयऊचुः । देव परद्रव्यहरणपरदारोपगमनपरहिंसादि निवारण मिति निवृत्तिरूपं दयादानप्रजापरिपालनयज्ञव्रतादराचर

भाषानुवाद ॥

दोहा ॥

उनमत गज सन दर्प्प सो श्रुति मर्य्यादा तोड़ि ।
डाकू निश्चय भूमिपति राज धर्म्म कां छोड़ि ॥ ७

जों हिनक एहि अपराध सों द्रोह करब तौं स्वामि द्रोह रूप पाप चयत जों सहब तों नाश पर्य्यवसन्न तैं हिन का मुनिक द्वारा धर्म्मक उपदेश करावी ततय मन्त्रिलोक बजाओल मुनि राजाकां कहल ॥

चौपाई ।

धर्म्मक अर्ज्जन करु महिपाल राज्यक कारण धर्म्म विशाल ।
मनदय हमर वचन सुनि लिय कियक आन नर अंह नर दिव ॥ ८

पूर्व्व अपनै वहुत पुण्य कयल तकर फल अपनै राज्य पाओल तैं एहु जन्म में निवृत्तपाप सों धर्म्म करु । राजा कहल की नाम पुण्य ॥

मुनि कहल परद्रव्य हरण परस्त्री गमन परहिंसा आदिक निवारण ई निवृत्तिरूप । दया दान प्रजा पालन यज्ञ व्रतादिक आचरण ई प्रवृत्ति रूप जे कर्म्म

* श्रुतं शास्त्रं हस्तिपक्षोक्तगजवशीकरणवचनंचेति । १
* पापान्निवृत्तः इतिक्वचित्पुस्तकेपाठः । २

या मिति प्रवृत्तिरूपं यत्कर्म्म वेदबोधितं तत्फलं पुण्यम् । राजोवाच । तेन किं क्रियते । मुनयऊचुः । त्रिवर्गं साध्यते । राजोवाच । किमत्र प्रमाणम् । मुनयऊचुः । वेदाः प्रमाणं परमेश्वरः प्रणेता । राजोवाच । परमेश्वर एव नास्ति कुत; तत्प्रणीता वेदाः । यदि भवति तदोपलभ्यते मया दृश्यते च नोपलभ्यते चेत्तदा नास्त्येवयूयं मुनयो मान्याः कथ मतथ्यैर्व्वचोभि र्म्मां प्रतारयथ यदि पुन रेवं वदिष्यथ तदा शास्तिभाजो भविष्यथ । इति समुपजातत्रासै र्म्मुनिभि र्व्वहिरागत्य परस्पर मुक्तं यदयं राजा नास्तिकः सता मुपदेश्यो न भवति कुतोवा कापथप्रवृत्ताना मुपदेशसाध्यं हितं ततो मुनयः स्वं स्वं स्थानं जग्मुः ततो मन्त्रिभिः परामृष्ट मटै श्चालोचितं यदयं कुप्रभुः केन चि दुपायेन राज्याद्वहिः क्रियते कनीयानस्यभ्राता राजा भवतु सर्व्वै स्तथा चरिते तथा बभूव ।

यतः । विरक्ता मन्त्रिणो यस्य तस्य राज्ये कुतः स्थितिः ।

विरक्तास्तु प्रजास्वायुः क्षीणं भवति भूपतेः ॥ ६

भाषानुवाद ॥

वेदबोधित तत्फल पुण्य । राजा कहल । ताहि सौं की हो । मुनि कहल । त्रिवर्ग्ग साधन । राजा कहल की यहि मैं प्रमाण । मुनि कहल वेद प्रमाण थो परमेश्वर प्रणेता राजा कहल परमेश्वर नहि कतय तत्प्रणीतवेद जौं से सवरहैत तौं प्रत्यक्ष होयित हमऊं देखितहु अहां लोकनि मान्य कौना मिथ्यावचनै हमरा प्रतारयितछीजौं पुन एहन कहब तौं दण्ड भागी हयब । यहिसौं त्रासित मुनि वाहरआवि परस्पर कहल ई राजानास्तिक सज्जन उपदेश पात्र नहिकतय कुपथचारी कां उपदेशसाध्य कल्याण ततय मुनि अपन अपन स्थान गेला ततयमन्त्री विचारल सैन्य देखल ई राजा भलमानुष नहि छिन का कौनहु यत्न सौं राज्यसौं वाहर करी कनिष्ठ छिनक धर्म्मनिष्ठ राजा होथुसंकल्प आचरणतिहन सन्ता तेहने होयित भेल ॥

दोहा ॥

मन्त्री जतय विरक्त राज्यं स्थितितनि कां कतय ।
प्रजा न रह अनुरक्त क्षीन आयु भूपति थिकथि ॥ ८

ततो भ्रातरि लब्धराज्ये सति भ्रात्रैवाहं हन्तव्योऽस्मीति भयेन पलाय्य तपोवनं जगाम तत्र च सर्व्वैरमात्यादिभिः परिहृतो निःपरिजनोऽपि लवङ्गिकानाम्नीं वेश्यां न परितत्याज वेश्यासहायस्तपोवने तिष्ठति तपस्विनां वनादानीतानि फलमूलानि बलादाच्छिद्य खादति ततस्तव भ्राता त्वां व्यापादयितुमागच्छतीति श्रावयित्वा त्रासिततपस्विभिः खेदितश्च तस्मादेकवेश्यामात्रसहायो निर्द्धनो निःपरिजनश्च प्राणभयेन गिरिगह्वरं विवेश तत्र च सर्व्ववस्तूनामभावात् प्रत्यहं धन्वी शरप्रहारेण मृगं व्यापादयन् व्याधइव मृगमांसेन जीवति एवं परमकष्टेन ताभ्यां कियत्यपि समये नीयमाने तयोर्व्वस्त्राणि जीर्णानि शीतकालः प्रत्यासन्नो बभूव द्वयोरप्येक एव कम्बलः शीतत्राणकरः द्वयोर्म्मिलित्वा प्रसुप्तयोस्तेनैकेन कम्बलेन प्रावरणं न भवति यदा पुरुषो मृगार्थी स्थानान्तरं गच्छति तदा एकः शिशिरेण परिभूयते एकदा लवङ्गिकया परमदुःखितयाभिहितं धिक्त्वां पुरुषाधम राजकुलजातोऽसि स्वज्ञानदोषेण

भाषानुवाद ॥

ततय भ्राता राजा भन्ता सैह हमर प्राण हरण करता यहि भय सौं पड़ाय तपोवन गेला ततय पुन सकल आत्मीय लोक सौं निःकासित परिजन रहिता सन्ता लवङ्गी नामक वेश्याकें नहि त्यागलनि। वेश्या मात्र सहाय तपोवन मैं रहथि तपस्वी लोकक वन सौं आनल कन्दमूल बल सौं छिनि २ खाथि तत तोहर भ्राता तोहरा मारक हेतु अबै छथि ई श्रवण करवाय त्रासित तपस्वी लोक सौं खिद्न गेला ततय एक वेश्या सहाय निर्द्धन निः परिजन प्राणनाशक त्रास सौं पर्व्वतकन्दर मैं प्रवेश कयल ततय पुन सब वस्तुक अभाव सौं प्रत्यह धनुर्द्धर शरप्रहार सौं मृग मारयित व्याधवत मृग मांस सौं जीवथि एन्तरह परम कष्ट सौं से दूनू व्यक्ति कतोक समय वितौलय सन्ता ताहि दुहुकें वस्त्र सब जीर्ण भयगेल शीतकाल सम्प्राप्त होइत भेल दूनू व्यक्ति मैं एक गोट कम्बल सैह शीत निवारणक वस्तु दूनू मिलि शयन कयलय सौं एक कम्बल सौं प्रावरण नहि हो जखन पुरुष मृग मारणार्थ जंगल जाथि तखन एकजन जाड़सौ भराभव अनुभव करथि एकवेरि लवङ्गी अङ्गीकार दुर्व्वार तादृश दुःख नहि कयलै कहल धिकतोहरा अधम

सीदसि मा मयरञ्च मानीय किमित्यवसादयसि, ततो मां मारय शात्यज दुःखं सोढुञ्च क्षमाक्षितच्च शूरोसिकथमेत दुःख मनुभवसि तथाहि।

पर्य्यङ्केन विना न यस्य शयनं याचा न वाहं विना
कर्प्पूरेण विना न पूरित मभूत्ताम्बूलपूर्णं मुखम्।
मायरै व्यंजनै र्विना न पवनः प्रायोऽभव त्प्रीतये
सत्वं सीदसि लुब्धकप्रतिनिधीभूतः कथं भूतवत् ॥ १०

रत्नाङ्गदउवाच। प्रिये मर्षय २ सुसमयसापेक्षः पुरुषस्य विपत्प्रतीकारः तदुद्वेगो न कर्त्तव्यः अस्यां रात्रौ त्व मग्निसेवया हिमपराभवं परिहर अहन्तु कम्बल मादाय द्वितीयकम्बलार्थं कापि गच्छामीति तुभ्य मचिरा देव कम्बल मानीय दास्यामीति सम्प्रतिज्ञः कम्बल मादाय नगरं प्रति जगाम क्वापि ब्राह्मणस्य गृहं सिन्धं दत्वा सिन्धमुखे स ञ्चारसमावेशनार्थं कम्बलं सिन्धमुख एव दत्वा परकम्बलार्थं गृहं

भाषानुवाद ॥

पुरुष कों राज कुल उत्पन्नपपन आनदोष सों सीदित छोड़कह चमरञ्ज अरण्य आनि की ई कष्ट देकह ततय चमरा मारह की काड़ह दुःखनहि सहि सकैछी तोह पुन शूर कोना एहन दुःख सहा करैछह हेतु।

षटपदछन्द ॥

नहि पलंग विनु शयन गमन वाहन विनु नहि पल।
नहि कर्पूर अहांकि पान विनु पूरित मुख छल॥
नहि विनु पंखा पवन अहांकां सुख मन आवै।
नाना रङ्गक राग तान गायिनि गण गावै॥
से अंहसीदित छोड़की व्याधक प्रति निधि भूतसन।
कह उपाय राजा थिकहुँ दुःखित छोड़क चमर मन॥ १०

राजा रत्नाङ्गदकहल। अये प्राणेश्वरी सहू २ सुसमयक अपेक्षा छोड़क पुरुष कों विपति छूटै मध तै उद्वेग नहिकर्त्तव्य तै आइ राति अग्निसेवासो जाड़ काटू हम पुन दोसर कम्बल हेतु कतहु जाइछी अहांकां सलर कम्बल आनि देव ई कहि कम्बल लय नगर प्रति गेला ककरहु ब्राह्मणक घर सिंधि देल सिंधिक मुख संचार समावेश निमित्त कम्बल सिंधि मुहहि परदय कम्बल हेतु गृहप्रवेश कयल यावत ई ब्राह्मणक कम्बल

प्रविवेश यावदसौ ब्राह्मणस्य कम्बल मा कर्षति तावत्तस्य ब्राह्मणस्य निद्राभंगो जातः अस्मनिद्रं ब्राह्मणं ज्ञात्वा चौरोवहि र्निश्चक्राम । ब्राह्मणस्तु रे रे पौरा श्चौरं मारयत इति मुहुरुच्चै र्निजगाद तेन त्रासे न चौरः स्वकीय मपि कम्बलं परित्यज्य पलायितः पलायमानस्तु परिश्रान्तः कियत्यपि दूरे स्थित्वा भीतार्त्त श्चिन्तयामास अहो मया परकम्बलार्थ मागतेन स्वकीयकम्बलोऽपि हारितः तत्केन कृत मिदं कर्त्तु रिच्छाप्रयत्नाभ्यां विना क्रिया न संभवति तत्कस्येच्छया कस्य प्रयत्नेन मम कम्बलो गतः यदि ममेच्छया भवति तदा ममैव निर्वृतकम्बलस्य लाभः सम्पद्यते तद्विपरीतं केन कृतं सतावदस्ति कश्चित्कर्त्तुः स्वभावः संसारे मन्ये स एवेश्वर स्त मारांध्यत्वेन निर्दिशन्ति मुनयः इति परिचितः पदार्थः अहो कष्टं मोहेनाऽद्यपर्य्यन्तं मया संसारकर्त्ताऽपि न परिचितः ।

अवोधेना सवाक्यानां मनोदोषै र्म्मदादिभिः ।
अपि त्रैलोक्यनिर्म्माता न ज्ञातः परमेश्वरः ॥ ११

भाषानुवाद ॥

आकर्षण करथि तावत तेहि ब्राह्मणक निद्राभङ्ग भेल जागल ब्राह्मण कें जानि चोर बहराय पड़यलाह ब्राह्मण पुन रे रे समाज नगर लोक चोर कें मारु ई अति उच्चस्वर सौं शोर कयल तेहि त्रास सौं चोर अपनो कम्बल परित्याग कय पड़यलाह पलायित परिश्रान्त कतोक दूर पर स्वस्थ भीतार्त्त चिन्ता कयल आश्चर्य्य एक पर कम्बलार्थ आगत अपनो कम्बल विघटाओल से कें ई कयल कर्त्ताक इच्छा प्रयत्न विना क्रिया संभव नहि से ककर इच्छा सौ ककर प्रयत्न सौं हमर कम्बल गेल यदि हमर इच्छा सौं होइत तखन हमरहि विघटित कम्बल कें लाभ होइत तकर विपरीतकें कयलकहि तावतअछि केओ कर्त्ता पुरुषक स्वभाव संसार में अनुमान होइछ सैह ईश्वर तनिकें आराधनताओं देखवैत छथि मुनिलोक ई जानल पदार्थ आः कष्ट मोह सौं अद्यावधि हमरा संसार कर्त्ता से हो नहि परिचित ॥

सोरठा ।

मनक मदादिक दोष गुरुक वाक्य नैं बोधनहि ।
जानल नहि भरि पोष तीनि लोककर्त्ता कतहु ॥ ११

अथवा जन्मजन्म मनुष्याणां कामा त्पापानि कुर्व्वताम्
यदा धर्म्मे मवे द्बुद्धि स्तदैव दिवसं भुवम् ॥ १२

अपिच यदैवाराध्यते धर्म्म स्तत्क्तादोषेपि जन्तुना ।
तदादि रेष कालोऽस्तु स्वर्गायच शुभायच ॥ १३

अपिच भेषजेन विना व्याधि रपगच्छति रोगिणः ।
पुण्येनापि तथा मन्ये पापात्त्यजति पापिनः ॥ १४

तदादारभ्य तपश्चरणपरायणो भवामि इतिकृतनिश्चयः स राजा वन स्थां गणिकां करुणया पुर मानीय तत्याज स्वयं चिन्तयामास तथाहि ।

ये जाता दिवसा गता हि खलु ते ना यान्ति यत्नात्पुन
र्याश्यन्तो पिहि सन्ति सन्त बहवः कालः कुत स्तावधिः ।
अद्यारभ्य तत्चराचरगुरो श्शम्भोः पदाम्भोरुहे
चेतः षट्पदयन् तमो विरमय क्षेप्यामि शेषंवयः ॥ ७

भाषानुवाद ।

सोरठा ।

जन्म जन्म नर देह करहि कामसौं पापकत ।
से आनन्दक गेह धर्मे बुद्धि है जाहि दिन ॥ १२
जखन प्राणिवार धर्म्मे दोष सकलकें दूरिकय ।
ताहि दिनहि सौं धर्म्म स्वर्ग्ग हेतु शुभ हेतु हो ॥ १३
औषध विनु नहि व्याधि जेहन छुटै अछि रोगिकैं ।
नहि विनु पुण्य समाधि पापकि पापी कां छुटय ॥ १४

तैं हेतु आज सौं तपस्या चरण पर हयब एहन निश्चय युक्त राजा वनस्था वेश्याकैं करुणा सौं नगर मैं आनि त्यागल अपने चिन्ताकरयित भेला ॥

दोवयछन्द ॥

जे दिन वितल वितल से निश्चय से दिन पुन नहि आवय ।
तिहने सम दिन पुन पुन आगत काल आदिके पावय ॥
सकल चराचर गुरु शंकर पद कमल भ्रमर मन भमरा ।
शिव सेवा मैं आश गमायब रहे अज्ञान कि समरा ॥ १५

तत स राजा महानुभाव स्तपस्वी बभूव इलोकस्तु ।

न चौरो न तपस्वीवा जातमात्रोऽस्ति मानवः ।
स्वव्यापारपरीणामा द्वर्तित इचौर इहकथ्यते ॥ ८

इत्यनुशयिकथा ॥

अथप्रत्युदाहरणीभूता दाम्भिकादयो न प्रत्युदाहृताः पुरुषलक्षणानाक्रान्तत्वात् ते नहि पुरुषाः किन्तु वञ्चकगणपरिचिता भवन्ति व्यङ्गिकलं हि प्रत्युदाहरणं न सम्भवति । अथार्थकथा प्रारभ्यते ॥

तद्यथा । महेच्छमूढवह्वाशाः कथ्यन्ते धनिकास्त्रयः ।
यथा लक्षण भेदेन उदाहृतिकथास्तथा ॥ १

तेषुप्रथमं महेच्छो यथा ॥

न्यायेनो पार्ज्जितं वित्तं दाने भोगेच योजयन् ।
यः पुण्ययशसोः पात्रं महेच्छ स प्रकीर्त्तितः ॥ २

भाषानुवाद ॥

ततय से राजा महानुभाव तपस्वी होइत भेला ॥

दोहा ।

जन्ममात्र सौं होथि नहि चोर तपस्वीनाम ।
अपन क्रिया परिणाम सौं जेहन नाम से ठाम ॥ ८

इतिअनुशयिकथा ॥

प्रत्युदाहरणकोटि में दाम्भिक आदिकां प्रत्युदाहरण नहि लिखल पुरुष लक्षणसों बाह्य जानिसे सब पुरुष नहि किन्तु वंचकगण परिचितछथि व्यङ्गविकल प्रत्युदाहरण संभव नहि ।

अथअर्थकथारम्भ ।

धनिकक तीन भेद महेच्छ मूढ वह्वाश हिनक लक्षण ओकथा कहैछी ताहिमें महेच्छ जेहन ।

सोरठा ।

न्याय उपार्जित वित्त व्ययकरी दान सुभोगमें ।
पुण्यसुकीर्त्ति सुचित्त से महेच्छ लक्षण सुभग ॥२

बभूव पाण्डुपत्तने गौड़महीपमन्त्री महाराजदेवो नामक्षत्रियः सच स्वामिभक्तिपवित्रः प्रभुसन्मानपात्रं आतपत्रपरिचितत्वात् नायकखाश इति नामलेभे पश्चात् सत्यराजो बभूव तथाहि ॥

धर्म्मार्थकाममोक्षाख्ये पुरुषार्थचतुष्टये ।
तन्न पश्यामि लोके यः स्वामिभक्त्या न सिद्ध्यति ॥ ३

तत स मन्त्री सहजधार्म्मिको धर्म्माविरुद्धै रुपायैः क्षयस्थितिवृद्धि परामर्शसनाथैः प्रचुरधन मर्ज्जितवान् सञ्चितधनं श्चिन्तयामास यद्यप्यर्थः स्वतन्त्र एव पुरुषार्थः श्रीमानहमस्मीत्यभिमानो विद्यत एव सर्व्वतोमुखो श्रीरप्यस्ति तदाधिकाधिकधनोपार्ज्जने परीक्षितभक्तयः कार्य्यकुशलाः पुरुषा नियुक्ता एव सन्ति तथाहि ॥

नाप्ताः परिजना यस्य यश्चाप्तेषु न विश्वसेत ।
कार्य्यभारस्य वोढाऽसौ न कार्य्यफलभाजनम् ॥ ४

भाषानुवाद।

भेलाह पाण्डुपत्तनमे गौड़ महीपालक मन्त्री महराज देव नामक क्षत्रिय सेपुन स्वामि भक्ति पवित्र प्रभु सन्मान पात्र छत्रको परिचित नायकखाश एहन उपाधि पाओल पश्चात् सत्यराज होइत भेला।

सोरठा।

धर्म्म अर्थ औ काम मोक्ष चारि पुरुषार्थमे ।
से देखल नहि ठाम स्वामि भक्तितः सिद्ध नहि ॥ ३

ततय से मन्त्री अपनहि धर्म्म शील धर्म्मक अविरुद्धक उपाय सों क्षय स्थिति वृद्धि विचार सो बहुत धन अर्ज्जन संचित धन सन्ता विचार कयल यद्यपि अर्थ अपनहि पुरुषार्थ श्रीमान् हमछी एहनअभिमान वर्त्तमान अछए सर्व्व भाव सो लक्ष्मीसेहोछथि। तैं ताहि सों अधिक अधिकधन उपार्ज्जनमें निपुण २ पुरुष नियुक्त छथि दृष्टान्त।

दोहा।

परिजन जनि क्यो सुहित नहि हितमें नहि विश्वास।
कार्य्य भार भरिया थिकथि कतय कार्य्य फल आस ॥ ५

अपि च य: कृतार्थ मिवात्मानं सञ्चिते मन्यते धनम्।
निरुद्योगतया तस्य लक्ष्मी रग्रे न वर्द्धते ॥ ५ ॥
सहायाः कुशला यस्य बहवो वशवर्त्तिनः।
करोपान्तगता तस्य धनोपार्ज्जनयोग्यता ॥ ६ ॥
किञ्च। न धनं धन मित्याहु र्धन मर्ज्जनयोग्यता।
क्षीयतेऽपि धनं पुंसां योग्यता तु न क्षीयते ॥ ७ ॥

तस्मादिदानीं सर्व्व मस्तीत्यत्र धनार्थं क्वापि चिन्ताऽस्ति धनप्रयोजनन्तु चिन्त्यं भवति। यतः।

प्रस्थमात्रं नृपो भुंक्ते प्रस्थ ञ्चैवेतरे जनाः।
किं मम धन सम्पत्या किं मेषा ञ्च धनै र्व्विना ॥ ८ ॥

ततो धने लब्धे फलभाजनं भवामीति परामृश्य स्रक्चन्दनवनिताताम्बूलादिभि र्धर्म्माविरुद्धानि सुखान्यनुभवन्निष्टापूर्त्तादिभिः की

भाषानुवाद

दोहा।

जे कृतार्थ अपना बुझथि संचित मानथि वित्त।
आगां नहि लक्ष्मी वढथि उद्यम हीन निमित्त ॥५

सोरठा।

जनिकाँ कुशल सहाय बहुत अपन जन वश रहय।
तनि कहि करमें आय वसथि धनार्ज्जन योग्यता ॥६

तें सम्प्रति सब अछिए धनार्ज्जनार्थ किछु चिन्ता अछि सेहो व्यर्थी।

सोरठा।

वित्त न वित्त कहाव वित्त तदर्ज्जन योग्यता।
पुरुषक वित्त बिलाव नहि बिलाय ओ योग्यता ॥७
प्रस्थ मात्र नृप खाथि ततबय खाथि तदन्य जन।
अन्तन संग लय जाथि की धनबिनु ककरा खगय ॥८

ततय धनलाभ भेलासों धनफल भाजन होइ ई विचारि माला चानन स्त्री ताम्बूल आदिसों धर्म्मक अविरुद्ध सुखअनुभव करयित (इष्टा पूर्त्त) आदिसों कीर्त्ति स्थापन

र्त्तिं ख्यापयन् तुलापुरुषादिमहादानदानैःपुण्यं सञ्चितवान् काञ्चनैः कलासु गुणिनः पूजयन् परमवैदग्ध्येन यौवन न्निनाय यौवनान्ते च विषय विरक्तौ जातायां व्रतोपवासादि कायक्लेशसाध्य मपि पुण्यराशिं सञ्चि तवान् प्रत्यासन्ने च सर्व्वदर्प्पहरे च वार्द्धके वयसि क्रमक्रमेण देहे रूप बलयो रपचय ञ्च गृहे धनाना मुपचयं दृष्ट्वा चिन्तयामास ।

यास्यन्त्येव धनानि मय्युपरते यास्यन्ति सर्व्वाः कला
यास्यन्ति प्रभुशक्तयः चय मिमा यास्यन्ति देहश्रियः ।
एवं यास्यति वैभवेऽपि सकले त्यक्ता चिरेणा पि न
स्तद्दृष्ट्वा विजयोत्सवाय सकलं किन्न त्यजामो वयम् ॥ ८ ॥

तस्य सकलवैभवत्यागे तृष्णात्यागः प्रकाशितो भवतीति हरिश्चन्द्रस्य स्पर्द्धया सर्व्वस्वं ब्राह्मणेभ्यो दत्वा विक्रमादित्यस्पर्द्धया गङ्गासरय्वोः सङ्गमे स सत्यराजोऽनशनविधिना तनुं त्यक्त्वा सुरलोकपूजितः स्वर्गं जगाम । श्लोकस्तु

भाषानुवाद ॥

करैत तुलापुरुष महा दानसौं पुण्य संचित कयल कांचन सौं कला विज्ञ गुणिलोकक सत्कारकरयित परमवैदग्ध्यसौं युवावस्था विताओल तरुणावस्थाकअन्तमे विषयविरक्ति भन्ता व्रतउपवास शरीर कष्टसाध्य पुण्यबहुतकरयित भेला प्राप्तभन्ता सर्व्व दर्प्प हरण कारक वृद्ध वयस विषय क्रमहि क्रम देहमें रूपबल घटल गृहमें धनकवृद्धि नहि सेदेखि चिन्ताकयल ।

षटपद्छन्द ।

धनकि रहत सम्पन्न कला हमरा तजि जाइति ।
रहति कि पुन प्रभु शक्ति देह शोभादि विलाइति ।
विभव विलायत सकल हमहु तनको परि त्यागव ।
सम्प्रति उचित विचार विषय झंझट नहिलागव ।
एहन अनित्यक चिन्तना व्यर्थवित्त अनुरागधर
तनि विजयक उत्सव उचित त्यजव कियक नहि धर्म्मपर ॥८

तैं सकल विभव त्यागसौ तृष्णात्याग प्रकाशितहो हरिचन्द्रक स्पर्द्धासौं सर्व्वस्व ब्राह्मण सबकोंदय विक्रमादित्यक कस्पर्द्धा सौं गङ्गा सरयूसङ्गममध्यसें सत्यराज निरा हार विधिसौं शरीर त्यागकअ सुरलोक पूजित स्वर्ग वास करयितभेला ।

आपरार्द्धे अपि सञ्चित धनस्याविरक्ति मदन सुसेवितः ।
आमनोरथ मिहार्थिनोऽर्च्चिताः पौरुषस्य किमतः परंसताम् ॥१०
अपिच । दूराद्‌पहार मुपागतेभ्यः केयाचकेभ्यो वसु नार्प्पयन्ति ।
दाता महेशो महराजदेवः प्रस्थापयत्प्रार्थकगेह मर्थान् ॥ ११

इति महेशकथा ।

अथ मूढकथा ॥

तद्यथा । लब्धमानधनावेशात् कृतलब्धधनव्ययः ।
त्रिवर्गविमुखोऽविज्ञ सम्मूढ इति कथ्यते ॥ १ ॥
आसीदयोध्यायां पुरि वसुर्न्नाम वणिक् तस्य प्रचुरधननामा पुत्रो बभूव सच पितर्युपरते लब्धपितृविभवः पितृजनवृद्धान पृच्छत। अये

भाषानुवाद ॥

चौपाइ ।

धनपरार्द्ध धरि अर्च्च न भयल । यावत विरति सुरति सुख कयल ।
पूर्ण मनोरथ सुपथक दान । कीपुरुषक एहिसों आन ॥ १०
याचक दुरसौं आवथि हार । धन दय के न करथि सत्कार ।
दाता एक नाम महराज । वित्त पठाव न आवक काज ॥११

इतिमहेशकथा ।

अथमूढकथा ॥

दोहा

बहुत कमाया हे तु सों संचित वित्त वीहाव ।
रहित त्रिवर्ग अविज्ञसे संज्ञा मूढ कहाव ॥ १
छलाह अयोध्यापुरीमें वसुनामक वैश्य तनिकाँ प्रचुरधन नाम पुत्र छलथिनि ताहि वसुक परलोक प्राप्त भेला धन स्वामी प्रचुरधन भेलाह पिताक सङ्गी वृद्ध लोक कें

वृद्धाः कथयत मम पिता केनोपायेन धन मेतावदर्ज्जितवान् । वृद्धा ऊचुः । वणिज्यया केवल न्तथाहि ।

वृद्धोपदेशतोज्ञानं प्रतिष्ठां राजसेवया ।
यशःपुण्यञ्च दानेन धन मिह वणिज्यया ॥ २ ॥

अथ स पुनरुवाच । की दृशी सा वणिज्या । वृद्धा ऊचुः । साधो पिता ते गौडे क्रीतं वस्तु गज्जने विक्रिणाय गज्जने क्रीतं गौडे विक्रिणाय यदा यद्वस्तु सुलभं तदा तत्क्रीणाति महार्घं विक्रीणीते । तद्यथा

देशाद्देशान्तरं नीतं काला त्कालान्तर यँथा ।
वस्तुमूल्यप्रभेदेन वणिजो लाभ मादिशेत् ॥ ३ ॥

अपिच । पतिभक्ता न या नारी व्यवसायी न यः पुमान्
तावुभौतु विलीयेते वृष्टेः पाषाणखण्डवत् ॥ ४ ॥

ततो भवानपि व्यवसाय ङ्कर्त्तु मर्हति । पुरुषो व्यवसायं विना लक्षेश्वरोऽपि लक्ष्म्या परिहीयते । तत स वणिक्पुत्र श्चिन्तयामास । यत्कोटि

भाषानुवाद ।

पूछल । अपनेो वृद्ध हमर पिता कोनउपाय सों एतिकधन अर्ज्जन कयल । वृद्धलोक उत्तर देल । केवल वाणिज्य सों हेतु ॥

चौपाई ।

वृद्धवचनसों पावौ ज्ञान । नृपनिकसेवासों सोमान ।
कीर्त्ति पुण्यसो दिलहि दान । धन हुआकरुवणि जविधान ॥ २

पुनु पुछल वृद्ध लोकक कथा सूनि पुछल की रीति वाणिज्यक । वृद्धलोक कहल । बाप अहांक गौड़देशमें वस्तु किनथि गजनी जाय बेचथि गजनीमें जे वस्तुकीनथिसे गौड़देश जाय बेचथि जखन जे वस्तु सुलभ देखथि से कीनथि जे महार्घ देखथि से बेचथि ॥

सोरठा ।

पति भक्ता न जे नारि व्यवसायी जे पुरुष नहि ।
से विलाथिभारूमारि वर्षा प्रस्तर खण्डसम ॥ ४

ततय अहांक व्यवसाय करक योग्यछी पुरुष व्यवसाय विना लक्षेश्वरो रहथि तथापि लक्ष्मी सों हीन भय जाइछथि ततय वणिकपुत्र चिन्ताकयल जों कोटि संख्यक हमरा

संख्यं मम वित्तं विद्यते तन्मध्ये लक्षक्रीतं वस्तु देशा देशान्तरं नीतं चतुर्गुणं भविता भाव्यमानायां धनवृद्धौ का चिन्ता दशभिरेव लक्षैः पुनः कोटि मुत्पादयिष्यामि दशलक्षं परिशिष्टं धनव्ययं कुर्व्वन् संप्रति यौवनोचितं सुख मनुभवामि ।

यतः । अर्था भवन्ति गच्छन्ति लभ्यन्ते च पुनः पुनः ।
पुन र्व्याघुट्य नायाति विगतं यौवनं वयः ॥ ५ ॥

इति श्रुत्वा परिजना स्तुष्टुवुः । साधु वणिक्पुत्र पिता तव कृपण आसीत् धनोपार्ज्जनायासमात्रं बभूव धनन्त्वया भोक्तव्यं तेषां वचने जातरभसः सर्व्वस्वं व्यय मङ्गीचकार ।

यतः । धनं यस्य चाति स्तस्य व्ययव्यसनकर्म्माणि ।
भोक्तृणां पुन रन्येषां धनव्ययव्यथा कुतः ॥ ६ ॥

भाषानुवाद ॥

धन अछि ताहिमें एकलाखे सों कीनल वस्तु देश देशान्तर में चतुर्गुण अवश्य हयत होनिहार धन वृद्धिसन्ता की चिन्ता दशहि लाख सों कोटि बनाय लेब दशलाखसों परिशिष्ट धन खर्च कय तरुण अवस्थाक उचित सुख अनुभव करब ॥

शोरठा ।

विधिकृत सहज स्वभाव धन जएतो अएतो पलटि ।
यौवन घुरि नहि आव वयस विगत पछताव मन ॥ ५

ई शुनि परिजन कहल । साधु वणिक पुत्र अहाँक पिता कृपण छलाह धनउपार्ज्जनक केश मात्र भागी रहथि धन अहाँ भोगकरब इनि लोकक कथासों वनियाँको रभस वाढल सर्व्वस्व व्यय करक अङ्गीकार कयल ॥

चौपाई ।

चोति तनि के जे छथि धनवान । धनक खर्च दुख मानन जान ॥
संचित कय धन वंचक खाय । निर्धन भेले सब दुरि जाय ॥ ६

अन्यच्च। आसादयन्ति खादन्ति यावत्स्वामिधनं नराः।
तावदेव स्तुवन्त्येनं क्षीणवित्तं त्यजन्ति च॥ ७

इत्युदर्कं परामृष्यन्नेव सयुवा स्रक्चन्दनवनितानामुपयोगेन सर्व्व स्वधन मुच्छन्न मकरोत् परिशिष्टदशलक्षेऽपि पूर्व्ववदेव परामर्शेन लक्षमेकं धृत्वा नवलक्षाणि योजयामास पश्चाद्दशम मपि लक्ष मखाद॥

तथा हि। क्षीयते निस्रवे कूपे जलोद्धृतजले जलम्।
निरुपाये तथा गेहे क्षीणं भवति वैभवम्॥ ८

ततः क्षीणे सर्व्वधने स वणिक्पुत्रः सर्व्वोपायासमर्थोऽवसादादवसाद। श्लोकस्तु।

वित्तं विना बुद्धिविवेकहीनः पूर्व्वार्थगत्या बहुलव्ययश्च।
लब्धश्वरीनिर्द्धनता मुपेतः कमप्युपायं क्षमते न कर्त्तुम्॥ ९

इति मूढकथा॥

भाषानुवाद॥

लेथि खाथि स्वामिक धनढेरि। धुरि नहि हेरथि पड़लय बेरि॥
हल भल तावत यावत वित्त। धन विहीन कां एकन भृत्य॥ ७

एतत्तरह भागी से विना विचार युवा माला चन्दन स्त्री द्वारा स्वधन नष्ट कयल परिशेष दशलक्ष में पूर्वसंकल्पानुसार लक्षसंँप कयल पश्चात्दशमो लक्ष भक्षण कयल

दोहा।

निष्स्रवजल जलकूप सम खर्चहिजाय सुखाय।
क्षीण विभव धुरिआवकत घरजेहन निरुपाय॥ ८

ततय क्षीण सकल धनसन्ता से वनिआंक बेटा सब उपाय में अक्षिय जीवित सौं जीवित छोड़त भेला।

चौपाई।

धन नहि पुन नहि धर्म्म विचार। पूर्व्व अर्थ जकाव्यय व्यवहार।
धनी पुरुष निर्धन भऽजाय। करता की नहि सुझनि उपाय॥ ९

इति मूढकथा।

अथ वञ्चाशकथा ।

तद्यथा । न तृप्यति धनै र्लब्धै र्बहुलाभसमीहया ।
बहुधारोपय न्नाशां वञ्चाशः परिकीर्त्तितः ॥ १ ॥

आसीत् विजयपुरे कृतकुशलो नाम मालाकारः स मालानिर्म्मा णकुशलः पुष्पदानविज्ञो नागरजनानां सेवां कुर्व्वन्नगरवासिभि र्दत्तं धनं प्रचुरमपि स्वल्पं मन्यमानः पुनः प्रचुरधनाशया नृपतिसेवामारेभे नरपति निषेवमाणस्य तस्य मालाग्रथनकौशलेन पुष्पावसरे पुष्पपूरणो नच राजप्रसाद मासादयतो बहूनि धनानि बभूवुः । तथापि तस्य तृष्णापगमो न भूतः ततो यथोत्तरं तृष्णाव्याकुल श्चिन्तयामास ।

अलब्धे सम्यगौदास्या ल्लब्धेऽसन्तोषपोषणात् ।
अतिदाना त्सुखासङ्गा द्धनवृद्धि र्न जायते ॥ २ ॥

इति परामृश्य कलाकृषिवाणिज्यपाशुपाल्यादिषु धनोपायेषु धनानि व्यापारयामास स्वयञ्च स्ववृत्तिपरायणो बभूव । राजसेवा मत्यज

भाषानुवाद ।

अथ वञ्चाशकथा ।

लाभ बहुत धन व्यग्र चित्त । बहुत लाभ मैं छोथि प्रवृत्त ।
बहुत मध्य आशाकाँ राख । से वञ्चाश सुकवि जन भाख ।१

छला विजय पुरमै कृतकुशल नामक मालि सेमालाक निर्म्माण मैं निपुण फूल पहुचय वामें दक्ष नगरलोकक सेवा करयित नगर वासी लोकसौं बहुत धन लाभङ्ग सन्ता बहुत धनक आशासौं अपन बहुत धनकाँ अल्पमानि पुन से राजाक सेवा करय लगलाह तनिक मालाक रचना औ समयमरपुष्प पहुचयवा सौं राजाक प्रसादसौं बहुत धन प्राप्ति करयित भेला तथापि तनिकाँ तृष्णा क्षय नहि भेलि ततय उत्तरोत्तर तृष्णासौं पराभूत चिन्ता कयल ।

चौपाई

नहि भौ लाभ खिन्न तैं चित्त । असन्तोष मन भएलहु वित्त ।
अति व्यय दान सुखक आसंग । ईसल नहि धन वृद्धिक रङ्ग ॥२

ईविचारि कला कृषि वणिज्य पशुपालन आदि धनक उपाय मैं धनबहुत योजित कयल अपनै अपन वृत्ति पालन करयित भेला राजाक सेवा त्यागल अपनासौं अतिरिक्त मै

त्वात्मातिरिक्तेष्वजातविश्वासः स्वयमेव सर्व्वं कुर्व्वाणो व्याकुलो बभूव यदा वाणिज्य मधि तिष्ठति तदा कृषि र्न सम्भवति यदा कृषिं कुरुते तदा कलाग्रहणं न सम्भवति यदा कला क्कलयति तदा पशुपोषणं न सम्पद्यते सदैकतः साशङ्कं परतः प्रच्युतो बभूव तथा सति सर्व्वं चिकीर्षुं रपि किमपि कर्त्तु मशक्नुवानः परमनिष्क्रियो बभूव जातकोपेन राज्ञा तस्य धनानि गृहीतानि ।

यतः । आजन्म सेवितो राजा क्षणमात्रं प्रमाद्यतः ॥
यदि जीवं न गृह्णाति धनं गृह्णाति शत्रुवत् ३ ॥

ततो हीनधनो मालाकारः स दरिद्रता मुपगतो दारिद्र्यदोषै रधितिष्ठतः ॥

यतः । क्षुधा दुर्ल्लभलाभेच्छा मौखर्य्यं काकुभाषणम् ।
पञ्च दोषा दरिद्रस्य प्रस्तावे चानभिज्ञता ॥ ४

भाषानुवाद ॥

विश्वासिमहि अपनहि सबकरयित व्याकुल होइत भेला जौं वाणिज्य देखथि तौं कृषिकर्म्म सम्यक नहिहो कृषिकर्म्म तत्परभेलाओं कलाग्रहण नहिचलै जौं कला देखथि तौं पशुपालन नहि निवहै एकघर धानक विश्वास नहि एक करैत दोसर दूरिजाय तेहन सन्ता सर्व्वं सम्पन्न कर्त्त व्यकइच्छासन्ता किछु करै नहि सकथि परमनिः क्रिय होइतभेला कुपित राजा तनिमाला कारक धन स्वाधीन कयलेल ॥

दोहा ।

राजा सेवल जन्म भरि क्षण प्रमाद जौं भेल ।
जीववचै तौं वड़तधिक अरि सम धन हरिगेल ॥ ३

ततय धनहीन माळि दरिद्रता प्राप्त दारिद्र्य दोषसौं आक्रान्त रहय लगलाह ।

चौपाई ।

अतिशय क्षुधा सतत सञ्चरथि । दुर्ल्लभ लाभक इच्छा करथि ।
अनभिज्ञता सकल प्रस्ताव । अभावचन कह बुझि विनुभाव ।
मुखर काकु भाषा पुन वाच । दोषदरिद्रक देखिअ पाँच ।
विनु अपराधहु जन मन रोष । दुस्सह सबसो दारिद्र दोष ॥४

ततः स मालाकारो दरिद्रोऽपि पुरुषलक्षणाक्रान्तः परिवारभरणार्थं पुनः पुनः पौरुषमारभते एकदा तूपायनभूतानि पुष्पाणि नीत्वा रात्रौ नगरान्नगरान्तरं गच्छन् प्रान्तरे पुष्करिणीद्वयमध्ये महत्परिमाणभाण्डसप्तकं सञ्चरद्ददर्श दृष्ट्वा चिन्तयामास अहो कथमचेतनानि भाण्डान्येकस्याः पुष्करिण्या निस्सृत्यपरां पुष्करिणीं गच्छन्ति परमाद्भुतमेतत् प्रायेण निधिभाण्डानि भवन्ति अमूनि निधिदेवताशक्त्या सञ्चरन्ति ततः पूजया प्रीतिपूजयामास। ततः कियताऽपि कालेन प्रतिरात्रिपूजातुष्टात् प्रथमभाण्डात् करुणार्द्रं वचनमुत्थितं रे दरिद्र पश्चान्निभाण्डात् सुवर्णं ग्रहीष्यसि तत्पश्चात्त्रिभिरपि पञ्चभिस्तदेवोक्तं सप्तमभाण्डेन सम्यक् विघटितपिधानेन प्रकाशितसुवर्णेनोक्तं रे मालाकार गृहाण सुवर्णं सप्तभिरस्माभिर्दीयमानान् सप्तैवाञ्जलीन् ग्रहीष्यसि नापरं ततो जातहर्षेण मालाकारेण सप्ताञ्जलिसुवर्णानि गृहीत्वा पुष्पकरण्डोले कृतानि लोभातिरेकादष्टममप्यञ्जलिं गृहीतुं भाण्डे हस्तौ निःक्षिप्तौ भाण्डे

भाषानुवाद

ततय सेमालि दरिद्रो रहय तथापि पुरुष लक्षण युक्त परिवारक हेतु पुन पुन पौरुष करय लागल एक समय उपायनार्थपुष्पलय रात्रिमें नगरसौं नगरान्तर जाइत पातर मैं दुइ पुष्करणीक मध्य महाभाण्ड सातगोट संचरित देखयित भेला देखि चिन्ता कयल अः कोना अचेतन भाण्डएकपुष्करणी सौं बहराय दोसरपुष्करिणी मैं जाइछ ई अति अद्भुत प्रायः निधिभाण्ड थिक ईसब निधिदेवताक शक्तिसौं चलैछ ततय पूजव ई विचारि सेभाण्ड सबकैं मालादय पूजल ततय एनतरह कतोक काल गत भला प्रति रात्रिपूजा सन्तुष्ट प्रथम भाण्ड सौं करुणापूरित शब्द उठल रे दरिद्र पश्चात अबैत भाण्डसौं सुवर्ण लिहैं पश्चात् पाचड़ भाण्डसो प्रथमभाण्डवत् शब्द होइतभेल। सप्तमभाण्डसौं उदघाटित झापन प्रकाशित सुवर्ण सौं शब्द एहन भेल रे मालि ग्रहण कर सुवर्ण सातो गोटाक हमरा लोकक देल सात आँजुरि ताहिसौं अधिक नहि ततय हर्षित मालाकार सात आंजुरि सुवर्ण ग्रहण की पुष्प कण्डोलमैं कयल ॥

न तु सत्वरघटितपिधानपुटेन सम्वरता तस्य मालाकारस्य बाहू मूला दुत्पाटितौ उत्पाटितबाहुस्तु मालाकारः पञ्चत्वं जगाम । श्लोकस्तु ।

धातवः ककुभ सर्व्वाः परार्द्ध धनकांक्षिणः ।
आप्राणमकृतार्थस्य वह्न्यार्थस्य कुतः सुखम् ॥ ५ ॥

इति वह्न्यार्थकथा ।

अथसावधानकथा ॥

तद्यथा । शौर्य्येणोपार्ज्जितं वित्तं बुद्ध्या पात्यवधानतः ।
सावधान स्य सुप्रोक्तः कचिल्लक्ष्म्या न हीयते ॥ १

बभूव जयन्तीनामपुरी तस्यां वीरपराक्रमो नाम राजा बभूव स च शौर्य्योपार्ज्जितबहुवित्तो नीतिनेत्रो बहुपुत्रश्च परमकृतार्थो बभूव एक दारात्रौ सुखं शयानः स्त्रीक्रन्दनं शुश्राव पश्चादुत्तमस्त्रीकन्दनरवं श्रुत्वा

भाषानुवाद ॥

ततय लोभक आधिक्य सौं अष्टम अंजलि सुवर्ण ग्रहणार्थ भाण्ड मध्य दि हस्त क्षिपण कयल भाण्ड संपुटित सुख संचार कयल धयल तेहि माला कारक बाहु मूलसौं उत्पाटित भयगेल तदन्तेण मालाकार पंचताको प्राप्त भेला ।

चौपाई ।

सब दिश धातु धातुमय सूझ । धन परार्द्ध धरि इक्र अबूझ ।
नहि कृतार्थ यावत धरिनाय । सुख नहि पावथि जनवह्न्याय ॥ ५

इतिवह्न्यार्थकथा ।

अथ सावधानकथा ॥

चौपाई ॥

शौर्य्य उपार्ज्जन वित्त विशाल । अवधानै बुद्धिहि प्रतिपाल ।
सावधान तनिकर थिकनाम । लक्ष्मी सतत वसथि तहि ठाम ॥ १

एकै जयन्ती नामपुरी ताहिमै वीरपराक्रम नामक राजा छलाह शिशूरतासौं उपार्जित धननीतिनेत्र बहुपुत्र परम कृतार्थ रहथि एकसमय रात्रिमै सुखशयन सन्तास्त्रीक

बहिर्निश्चक्राम क्रन्दनानुसारेणैव गच्छन्नगराद्बहिः कियत्यपि दूरे सर्व्वावयवसुन्दरीं यौवनाढ्यां सर्व्वालङ्कारसंयुक्तां रुदतीन्ददर्श। राजोवाच। अयि सुन्दरि केन दुःखेन रोदिषि। सुन्दर्य्युवाच। राजपुत्र तवाहं लक्ष्मीरियद्दिनपर्य्यन्तं शूरस्य नयशालिनस्तव भुजलतायां स्थितास्मि इदानीमन्यत्र यास्यामीति रोदिमि। राजोवाच। तर्हि रुद्यते कुतः। लक्ष्मीरुवाच। तवानुरागेण। राजोवाच। यद्यनुरागस्तदापरित्यागे को हेतुः। लक्ष्मीरुवाच। न जानासि लक्ष्मीरहं चञ्चलप्रकृति र्नैकत्र चिरंवस्तुमिच्छामि।

शूरा द्विभेमि भजते न मृदौ प्रियत्वं
विद्वेषितां वितनुते विदुषां गणेषु।
नैकत्र तिष्ठति चिरं न चिरेण याति
लक्ष्म्याः स्थितिश्च गमनञ्च सामिसन्धि ॥ २

राजा परामृष्टवान् किं ममानुचितं विनानुचिताचरणेन लक्ष्मीर्न त्यजति पुरुषम् वड्डपुचितां परित्यज्य नान्यत्र यास्यामि निजदर्षणम्

भाषानुवाद ॥

रोदन शुनल पश्चात उत्तम स्त्रीक रोदन थिक ईबुझि बहरयला रोदनक अनुसार चलयित नगरवाहरभेला कतोक दूरमें सकलावयवसुन्दरी तरुणी सकल अलंकरण संयुक्ता कनैतकां देखल। राजाकहल अयि सुन्दरि कोनदुःखें कनैछी। सुन्दरीउत्तरदेल। राजापुत्र तोहर हम लक्ष्मी एतेकदिन धरि शूर नीतिमान तोहर भुजलताकछायामें छलहुएखन अन्यत्र जाइछी एहिकारणें कनैछी। राजा कहल। तों कनैछी कियक। लक्ष्मी कहल। तोहरहि अनुरागसों। राजा कहल। माताजों अनुरागतों त्यागकको कारण लक्ष्मी कहल से नहि जनैछह। लक्ष्मी हम चंचलस्वभावा नहि एकस्थलमें चिरनिवासक इच्छा रखैछी।

चौपाइ।

शूरहुमें मृदुमें भय जानि। बुधजन कां विद्वेषीमानि।
चिरलक्ष्मी न रहथिएकठाम। नहि पुनि छाड़थि अकरीथाम ॥ २

राजा विचारलकी हमर अनुचित विना अनुचित आचरणसों लक्ष्मीपुरुषकैं त्यागथि नहि बड्ड पुचिता दोषसों आन कोनो दोष देखला नहि जाइछ।

यथाहि । अपुत्रो नृपति र्भ्राम्यन्भूश्च बहुपुत्रवान् ।
प्रायशो दुःखदश्चैव भूपति र्बहुपुत्रिता ॥ ३ ॥

अन्यच्च । भूमिलोभाद्यशोलोभा द्धनलोभा च्च रागिणः ।
राज्ञः पुत्रा भवन्त्येव परस्परविरोधिनः ॥ ४ ॥

राजोवाच । भगवति कमले यदि यास्यसि परं कस्तवाकांक्षिते प्रतिबन्धं कर्त्तुं प्रभविष्यति याचे यद्येकमहन्तदहमेकं यथाचे तन्मे कृपया देहि लक्ष्मीरुवाच । यदि ममाऽन्यत्र गमने बाधो न कृत स्तदा वरं ब्रूहि यदन्यदिच्छसि दास्यामितत्ते । राजोवाच ॥ देवि मम पुत्राणा मसाहित्यं कदापि न भूयात् । श्रीरुवाच । तदा तवकुलान्मम गमन मन्यथ कथं स्यात् ॥ यतः ।

या नीचैर्गति राप गेव विलस द्विदुल्लतेवाऽस्थिरा
सन्ध्येव क्षणरागिणी गुणवती वेश्येव सर्व्वंगमा ।

भाषानुवाद ।

दोहा ।

होथु अपुत्र नरेश नहि होथुनबहु सुतवान ।
गडु बडु पडु सुत संघमे भल नहि बहुत प्रधान ॥३

भूमि यशो धन लोभसों बाढल मन अनुराग ।
नृपति पुत्र को गोष्ठमे कलह न क्षण भरि त्याग ॥ ४

राजा कहल हे भगवती कमलाख्यामात्तर जों अपने जाएब तों केरोकि सकत गेलि जाय जतय इच्छा आब किन्तु एकटा हम वर मंगैत छी से दयासों दिअ जाय । लक्ष्मी कहल । जों तों ह अन्यत्र जयवा मध्य नहि हमरा रोकलह तों मांगह वरजे इच्छा सेहम तोहरा दैत । राजा मांगलवर हेदेवी हमरापुत्र सवजनक असाहित्य कदापि नहि कयल जाय लक्ष्मी कहल तखन एतय सों अन्यत्र गमन हमर कोन प्रकार हयत हेतु ।

षटपदछन्द ॥

हमर नीच गति केहनि जेहनि गङ्गादिक धारा ।
स्थिरा केहनि हम थिकहु दामिनी घन संचारा ।
क्षण अनुरागिणि केहनि रागिणी सन्ध्या जेहनि ।
सर्व्व लोकगा नारि केहनि गुणवति वेश्या सनि ॥

साध्वंसी नयशालिनो नरपते र्विष्णोरिवाब्धि प्रिया ।
नागच्छामि नयै र्विनान कलहै र्गच्छामि लोकै र्विना ॥ ५

इत्यभिधाय लक्ष्मी स्तस्यैव गृहे चिरस्थिरा बभूव ॥

इतिसावधानकथा ॥

कृपणादय स्तु धनवन्तोऽपि न पुरुषलक्षणाक्रान्ता स्ततः पूर्व्वं प्रत्युदाहृता एव ॥

अथकामकथा ॥

तद्यथा । स्थायिभावो रतिर्य्यस्य पुरुषप्रमदे पदम् ।
शृङ्गार स्स रसः प्रोक्तः कामः शृङ्गारजं सुखम् ॥ १ ॥
त्रिवर्गेषु परः कामः फलं धर्म्मार्थयोरपि ।
तत्रासक्तो भवेद्यस्य स कामी कथ्यते पुमान् ॥ २ ॥

भाषानुवाद ॥

नीतिमान नरपतिक सम विष्णु जकां नित थितकरी ।
नहि आवो सम नीतिविनु कलह विना नहि संचरी ॥ ५
ई कहितलक्ष्मी तनि कहि गृह चिरकाल स्थिरा रहली ॥
इति सावधान कथा ।

कृपण आदि धनवन्तो होथि नहिपुरुषलक्षण घटित तें पूर्व्व प्रत्युदाहृत कयलीअछि ।

अथकामकथा ।

चौपाइ ।

स्थायि भाव रति जो जहि ठाम । रसशृङ्गार तनिक थिकनाम ।
शृङ्गारक उद्भव सुख जेह । काम नाम कहवित कवि तेह ॥ १
आलम्बन स्त्री पुरुष प्रधान । उतम जन मन अतय समान ।
बहुत विभाव बहुत अनुभाव । सात्त्विक भाव सुकवि गण गाव ॥२

सतु पञ्चविधिः ।

अनुकूलो दक्षिणश्चैव विदग्धो धूर्त्त एवच ।
धस्मर श्च समाख्यातः कामिनः पञ्चधा बुधैः ॥ ३ ॥

तेषु प्रथममनुकूलः कथ्यते तद्यथा ॥

अनुरक्तः स्वभार्य्यायां परस्त्रीषु पराङ्मुखः ।
नायको धर्म्मशृङ्गारी सोऽनुकूलो निगद्यते ॥ ४

पुरासीत् शूद्रकोनाम राजा तस्य सुखालसा नाम्नी महिषी बभूव समुत्पन्ने द्वयोस्तारुण्यभावे परस्परानुभावात्क्रमक्रमेण तथा प्रेम वृद्धिर्ज्जाता यथा स राजा द्वितीयां स्त्रियं न कामयते महिषी तु पतिव्रतैव तथाहि ॥

भाषानुवाद ॥

शोरठा ।

थ छ त्रिवर्ग्ग झकाम धर्म्मार्थक फल मुख्य थिक ।
तैं जे कामी नाम से पुन पांच प्रकार थिक ॥

रूपमालाछन्द ॥

प्रथम हो अनुकूल नायक दोसर दक्षिण नाम ।
तखन होथि विदग्ध नायक धूर्त्त जन सब ठाम ॥
नाम धस्मर से कहावथि होथि पांच प्रकार ।
कथा प्रस्तुत कहव गय हम सबक जे व्यवहार ॥३

ताहि मैं प्रथम अनु कूल कहैछी से जेहन ॥

चौपाई ।

जे निज वनिता मै अनुरक्त । अन्यस्त्रीक न रति आसक्त ।
सेनायक शृङ्गारक मूर्ख । तनिकै नाम विदित अनुकूल ॥ ४

पूर्व्व रहथि शूद्रक नाम राजा तनि कां सुखालसा नाम राणीछलथिनि प्राप्तदुनु सामर्थ्यभाव परस्पर अनुभाव सौं क्रमहि क्रम प्रेम वृद्धिभेला जाहि सौं राजा द्वितीय स्त्रीक मनः कामना नहि करथि राणी तौं पतिवृता ॥

भूयादेकसुखं प्रेम यूनो र्जन्मनि जन्मनि ।
धर्म्मं शृङ्गारसंयुक्तं सीताराघवयोरिव ॥ ५ ॥

भरतस्तु । स्वकीयापरकीयाच सामान्यवनितेत्यभिधायवदति ।
सम्पत्तौ च विपत्तौच मरणेऽपि न मुञ्चति ।
तत्स्वकीया म्प्रतिप्रेम जायते पुण्यकर्म्मणः ॥ ६

पश्चात्तेन प्रेम्णा कृतार्थौ तौ राजदम्पती हर्म्यतलेषूपवनेषु सरोप कण्ठेषु लतामन्दिरेषु कामकलाकुशलौ कामतत्वबोधितेन विलासप्रकारेण रममाणौ यथामनोरथं सुखेन समयञ्चिन्यतुः एकदात्वतिक्रान्ते रात्रिप्रथमयामे महार्हशय्यायां निद्रालसा महिषी कृष्णसर्प्पेण दष्टा सर्प्पदष्टायान्तु तस्यां परमशोकाकुलो राजा सर्व्वबलेन सर्व्वस्वव्ययेन विषमतीवैद्यद्वारा स मन्त्रौषधिप्रभावेण तस्याः प्राणरक्षा व्यकार जाताया मपि प्राणरक्षायां विषस्योग्रतया तस्याः शरीरे रूपपरा हत्तिरभूत् ॥

भाषानुवाद ।

चौपाई ॥

पतिमें स्त्री स्त्री पति अनुराग । धर्म्म शृगार युक्त मन लाग ।
जन्म जन्म हो सुन्दर रीति । सीता रघुनन्दन सन प्रीति ॥ ५

भरत पुन स्वकीया परकीया सामान्या ई कहि कहल ॥

दोहा ।

सम्पति तथा विपत्ति मैं मरण हु जे नहि त्याग ॥
तेहन स्वकीया प्रेम प्रति सुकृती का मन लाग ॥ ६ ॥

सेपश्चात् ताहि प्रेम सों राजा रानी कृतार्थ अपन प्रासादतल उपवन मैं सरोवर समीप मैं लता मन्दिर मैं काम कलाकुशल कुशला कन्दर्प्प तत्व बोधित प्रकारसों रम माण रममाणा जेहन मनोरथ सुखसों दिन व्यतीत करल युवा युवती एक समय प्रहर रात्रि गत सन्ता उत्तम शय्यास्था सुखालसा निद्राकुला महारानी कृष्णसर्प्प सों दंशिता भेली से सन्ता परम शोकाकुल राजा अपन बहुत लोक सों बहुत द्रव्य व्यय सों वि षमती वैद्यद्वारा से राजा मंत्र औ औषधिक प्रभावसों तनि रानीक प्राण रक्षा करा ओल भेलि औ रक्षां तथापि विष उग्रता सों तनिक शरीरक सुन्दरता जाइत रहलि ॥

तद्यथा । निर्द्दग्धिन्नं समजनि शिरो भृङ्गमालालकायाः
स्फाराकारं वदनमभवच्चारुचन्द्राननायाः ।
प्रातर्व्व्यालाकुवलयदृश श्चक्षु रन्तर्न्निमग्नं
काय स्तस्याः कमलसुरभिः पूतिगन्धो बभूव ॥ ७ ॥

तथाविधदुर्द्दशापन्ना मपि तां स राजा पूर्व्वानुरागेण सौन्दर्य्य स्मरणेन पूर्व्वानुभूताभिः कलाभिस्तदीयव्याधिप्रतिक्रियापरायणः स्नानं त्यजति न क्षुधया भुङ्क्ते न निद्रया शेते न ताम्बूलं गृह्णाति न कर्पूरलवङ्गं कवलयति न सचिवान् संभाषते न सेनाश्च समवलोकते मोह व्याकुलः केवलं चित्रार्पित इवावतिष्ठते तथाविधं राजानं दृष्ट्वा मन्त्रिणऊचुः । देव महादेवी तावदियं दैवायत्ता वर्त्तते मनुष्यैः किं कर्त्तव्यं अप्रतिक्रिये वस्तुनि उपेक्षैव वरं भवानासमुद्रक्षितिपतिः कथं राज्यं न चिन्तयति एका स्त्री मृतकल्पा तन्निमित्तमात्मानमवसादयति देव इति नोचितम् देवेजीवति तदधिकरूपयौवनसम्पन्नाः कतिपय

भाषानुवाद ॥

चौपाई ॥

भृङ्गमाल सन अलक विशाल । रहल न मौलि मध्य तत्काल ॥
बङ्गत कुरूप भेल मुख तनिक । पूर्णचन्द्रमा उपमा जनिक ॥
धसि गेल प्रातः कुवलय नयन । भेल अस्त जनु रूपक अयन ॥
कमलक सुरभि जनिक सुख आव । दुष्ट गन्ध से विषक प्रभाव । ७

तेहनियो दुर्द्दशा मे पड़लि रानी कां राजा पूर्व्वक अनुराग सौं ओ पूर्व्वक सुन्दरताक स्मरण सौं पूर्व्वक अनुभूत कला सौं तनिक व्याधि शान्तिक परायण तनिका नहि त्यागल नहि क्षुधा सौं खाथि नहि निद्रातुर शयन करथि नहि ताम्बूलक ग्रहण करथि नहि कर्पूरलवङ्गक आस्वादन करथि नहि मन्त्रीलोक सौं संभाषण करथि नहि सेनाक अवलोकन करथि मोह सौं व्याकुल केवल चित्र समान रहथि तथाविध राजा कां देखि मन्त्रीलोक कहल हे महाराज महादेवी तावत ई दैवक अधीना छथि मनुष्य की करत असाध्य प्रतीकार में उपाय नहि जाहि वस्तु में तकर उपेक्षा केवल उपाय । अपने आसमुद्र राजा कियक नहि राज्य चिन्ता कयल जाइछ एक स्त्री मृतकल्पा तनिक हेतु आत्मा कां अवसीदित नहि कर्त्तव्य अपनेक जिवम सन्ता छिनकहु सौं रूप यौवनवती कतिक स्त्री कौ नहि भेटति कतेक विवाह को नहि छयत तें ई विषाद व्यर्थ

स्त्रियो न मिलन्ति कति विवाहान सम्भवन्ति तदलं विषादेन देवस्य प्राक्तनक्रीताइव दिवसाः सुखोपभोगेन विना न नेतव्या भवन्ति ।। राजोवाच । अहो मन्त्रिणः श्रूयतां तावत् यदियं मम धर्म्मपत्नी धर्म्माचरणसहाया पुण्यपापयो र्भागिनी संसारसुखहेतुः प्राणसमा यावदियं मृतकल्पापि जीवति तावन्मम मरणे नाधिकारः किम्पुन र्जीवने यदियं मम मृते दुःखिनी भवति तत्किं प्रेम यत्र विस्मरणं तत्किं सौहृदं यत्र न समानसुखदुःखता तत्किं दाम्पत्यं यत्र नानुसरणव्यवहारः तत्कथं राज्यचिन्ता कर्त्तव्या कथमन्यस्त्री वाञ्छा मयि भविष्यति प्रथमविवाहो विधिनियोग एव द्वितीयस्त्रीपरिग्रहो लज्जापरित्यागे साहसं पुरुषस्य तन्मया निश्चितं ऽन्यस्त्रीपरिग्रहो न कर्त्तव्यः नवाऽनया विनाजीवितव्यम् । तथाहि

या कुत्रापि न विस्मृता नच दृशौ तृप्ते यदालोकनै
र्य्यस्याश्चाधरपानपावनतया श्लाघ्यं वपुः स्वीकृतम् ।

भाषानुवाद ।

अपनैक पूर्व्व पुण्य सौं क्रीत समान दिन सुखउपभोग विना जाइक से नहि कर्त्तव्य । राजा उत्तर देल । अहो मन्त्रीलोक सुनयितजाउ जौं ई हमर धर्म्मपत्नी धर्म्माचरणमे सहाया पापपुण्यक भागिनी संसार मे सुखदुःख हेतु प्राणसमा यावत मृततुल्योसनि जीवयित छथि तावत हमरा मरणहुमे अधिकार नहि कीपुन जीवनमे जौं हम मरि जाएब तौं हमर परोक्षमे दुःखभागिनीछथती सेकी प्रेम जाहिमे विस्मरण सेकी सुहृदता जाहिमे नहि समाना सुख दुःखता सेकी युवल जाहिमे नहि अनु सरणव्यवहार तैं हेतु हम कोना राज्य चिन्ता करब कोना पुन अन्यस्त्रीक वांछा अयति प्रथम विवाह विधिनियोग सौं द्वितीय स्त्रीक ग्रहण लज्जा परित्याग मैं पुरुष का साहसथिक तैं हम निश्चय कयल अन्यस्त्रीक ग्रहण नहिकरब नहि हिनका विना जीवो करब हेतु ॥

चौपाई ॥

जनिकांनहि क्षणविसरल हाय । कैचन कैचन प्रस्तावहु पाय ।
इनक विलोकनसौं सुख पाव । लोचन हमर तृप्ति नहि पाव ॥
पावन जनिक अधर कयपान । तनि शरीरमे धन्यभान ।

त्वम्मे प्राणसमाऽसि भाषित मिदं यस्यै विना नोत्सवे
तस्याः किं विरहेपि जीवितमना श्चाण्डालता न्नाश्रये ॥ ८ ॥

एवं तया महिष्या विना तं राजानं मरणैकशरणं ज्ञात्वा मन्त्रिण श्चिन्तयामासुः यदस्या महिष्याः प्राणरक्षया राजरक्षा राज्ञिरक्षिते वयं सनाथास्तदत्र सर्व्वथा यतामहे इति परामृष्य मन्त्रिभि स्सर्व्वै र्विषवैद्यानाऽऽहूय प्रतिक्रिया प्रारब्धा भाविताच विषज्ञानं प्राप्य नृत्यन्ती बभाष हे भूपाल त्वयि शासति पृथवीं मम स्वामी नागः पामरेण व्यापादितः तेनाहं शोकार्त्ता विधवा तं पामरं दृष्ट्वा वैरोद्धारमकरवं ततो मया परामृष्टं यदयं वराकः पामरो मम स्वामिनो राजकल्पस्य परिपन्थी न भवति तस्यापरिपन्थिनो वधेन कृतो वैरोद्धारः ततो राजानंमियाया दुःखं साहयित्वा मारयामीति दष्टा मया तवमहिषी । राजोवाच । हे नागपत्नि मम कोऽपराधः नागवधूरुवाच । त्वयि शासति पृथिवीं निरागसो मम स्वामिनः पामरेण कृतो बधः । राजोवाच ।

भाषानुवाद ॥

प्राणसमा हम अनिकाँ कहल । तनिकहु ब उत्सवनहिरहल ॥
तनिक विरह हुण जीवनचाम । चाण्डालत्वकिकरव प्रकाम ॥८

एनतरह तनिरानी विना राजा कैंमरण शरण जानि मन्त्रीलोक विचार कयल ई रानीक रक्षासौं राजाक रक्षा सन्ता हमरहु सबसनाथ तें सर्व्वथा रानी रक्षार्थ यत्नकरी ई विचारि मन्त्रीसब अनेक विषवैद्य कां बजाय विषदोषक उपचार आरम्भकरायोल । सेहन्ता विषज्ञानपावि नृत्यकरैत राजाकांकहल हैराजा तोंह पृथिवीक शासनकर्त्ता हमरस्वामी नागकांपामर मारय तैं हम शोकाकुला विधवा ताहिपामरकां देंखि वैरोद्धार करितहु ततय हमविचारि ई वेचारा पामरहमर स्वामीराज तुलक डाकू नहिथिक तनि अपरिपन्थीकवधसों कतय वैरोद्धार ततय राजाकां प्राणप्रियाक दुःख सहाय सहाय मारो ई हेतु हम दंशल तोहरमहारानीकैं । राजाकहल हेनागिनि हमरकोन अपराध । नागिनिकहल तोंह पृथिवीक राजा तखन निर्दोष हमर स्वामी कां पामर

हे नागपत्नि मया न ज्ञातमज्ञातमपराधं यमोऽपि क्षमते त्वं पुनः पतिव्रता दाक्षिण्यवती चासि तत्परित्यज मे प्रियाम्। नागवधूरुवाच। परित्यजाम्येनां यदि त्वमस्याः प्राणपरिवर्त्तेन स्वकीयप्राणान्ददासि। राजोवाच। अहो हर्षस्थानं दास्यामि प्राणानिति ब्रुवाणः पुलकितभुजमूलः खड्गमादाय शिरश्छेदवासनया स्वकीयकण्ठे नियोजयामास सानन्दमवादीच्च भवतु प्रियायाः प्रेमनिष्क्रयः प्राणनिष्क्रयस्तस्या एव प्रेमाणः। नागवधूरुवाच। राजन् न मर्त्तव्यं त्वं मर्त्तव्यं भवता मया तु परित्यक्ता तव प्रिया तवानेन पुरुषोचितक्रियानुरूपेण।

राज्यं समुद्रावधि रूपमुच्चैर्योग्यं वयो राजसुखोपयोगे।
एकस्य हेतोस्तरुणीजनस्य त्यजन् महीपाल विभासि विज्ञः ॥ ९

युवयोरिव जन्मान्तरे ममाप्यनुरागः स्यादनया वासनया मयापि पत्यनुमरणं कर्त्तव्यमित्यभिधाय ताम्महिषीन्तत्याज महिषी तु विषरोगोपगमे सति मेघावरोधपरिमुक्तचन्द्रकलेव पूर्व्वाधिकसौन्दर्य्यशा

भाषानुवाद

मारय राजाकहल हेनागपत्नि। हमरानहि वार्त्ता आज्ञातदोष यमोक्षमाकरथि किपुन अहाँ पतिव्रता सर्व्वप्राणीमे समानबुद्धिमती त्यागकरु हमर प्राणप्रियाकां। नागीकहल तों छिनकाहम छाडिदेव जों छिनक प्राणकवदलामे तोंह अपन प्राण दान करह। राजाकहल अतिहर्षककथा देव प्राण ईकहि पुलकित भुजमूल खड्ग आनि शिरच्छेदक वासनासों अपन कंठमे लगावएचाहल ओकहल आनन्दसों ओप्रियाप्रेमकवदला प्राण प्रेमकवदला प्राणेछी। नागिनिकहल हेराजा अनुतोमरह २ हमछोडल तोहर रानीकां देखिएहन तोहर सत्पुरुषकअनुराग।

चौपाइ।

समुद्रान्त धरिराज्य विशाल। रूपअनूप तरुण एहिकाल।
नृपसुख समय त्यजकछलविज्ञ। रानी कारण सत्यप्रतिज्ञ ॥९

अंहाँ दुहु व्यक्तिक सनकां जन्मान्तरमे हमरहु स्वामिक अनुराग हयत एहि वासनासों हमहु पतिक अनुमरण करब ईकहि ताहि रानीकां नागिनि त्यागकयल रानीपुन विष

लिनी बभूव राजाच निस्तीर्णविपत्सागरः परमक्षोत्साहस्तया सह सुचिरं राज्यसुखमन्वभूत् । श्लोकस्तु ।

सा दुर्णयोद्भूतविपत्पयोधौ मग्नाविभूतिः पुनरुत्थितेव ।
विहाय वैरूप्यमवाप कान्तिं स्वभूव राज्ञो नृपतेः सुखाय ॥ १० ॥

इत्यनुकूलकथा ।

अथ दक्षिणनायककथा ।

स्नेहार्द्रं स्याद्धर्म्मिणीनां गौरवं गृहिणीगतम् ।
न मुञ्चत्यन्यचित्तोऽपि दक्षिणः स उदाहृतः ॥ १ ॥

बभूव* गौडदेशे लक्ष्मणसेनो नाम राजा तस्य रत्नप्रभा नाम महिषी तदितराश्च भोगिन्यः कतिचिद्बभूवुः ताश्च पद्मिनीचित्रिणीश्यामलताहस्तिनीप्रभृतयो जन्मगुणैरुत्तमाः । स्वाधीनभर्तृका १ अभिसारिका २

भाषानुवाद ।

दोष दूरिभेलासौ मेघाच्छन्नसों प्रकाशिता चन्द्रकला समाना पूर्व्वहुसों अधिकसौन्दर्य्ययुताहोइतिभेली राजापुन विपत्तिसागर समुद्रोत्तीर्ण समान परम उत्साहयुक्त ताहिरानीक सङ्ग चिरकाल राज्यसुख भोग करयितभेला ।

दोधकछन्द ।

दुर्णय संभवविपति पयोनिधि मग्नविभूतिसमाना ।
उत्थितिहोइनि तेहनि रानिरानी त्यागल कान्ति मलाना ।
अतिशयसुन्दरिपरम हर्षिता रोगदोष नहि अंगे ।
पतिअनुकूलनृपति सुखदायिनि भेली पूर्व्वकरंगे ॥१०

इतिअनुकूलकथा ।

अथ दक्षिण नायककथा लिखैछन ।

चौपाई ।

सहधर्मिणी सरस अनुराग । गृहिणी गत गौरव नहित्याग ।
यद्यपि अन्यबद्ध मन रहय । सेदक्षिणलक्षण कवि कहय ।१

छलाहगौड़देशमे लक्ष्मणसेन राजा तनिका रत्नप्रभा नामरानी ताहिसों आन अनेकरसभोगिनी छलथिनि सेसबपुन पद्मिनी चित्रिणी श्यामलताहस्तिनीप्रभृति सहल

* बङ्गदेशंसमाश्रित्यभुवनेशान्तगं शिवे ॥ गौड़देश इस माख्यात स्सर्व्वविद्याविशारदः । इतिशक्तिसंगमतन्त्रे ।

उत्कण्ठिता ३ विप्रलब्धा ४ खण्डिता ५ कलहान्तरिता ६ वासकसज्जा ७ वियोगिनीना ८ मवस्थापरिग्रहेण विदग्धाश्च तं राजानं दातारमनुरागिणं सुभगं विज्ञाय ग्राम्यैः परिहासैर्म्मधुरै र्व्वचोभिः कुटिलैः भ्रूभङ्गै र्निर्दयैः कटाक्षै र्गाढै राश्लेषैः सुरतबन्धैः स्निग्धैश्चाधरपानैः सम्भोगप्रवृत्ताः परमानन्दभाजन म्बभूवुः। स राजा ताभि स्तरुणीभि स्तथा रममाणोऽपि महिष्यां रत्नप्रभायां तथा सद्भावं दर्शयति यथा सा जानाति अहमेवास्य प्रेयसी तदितराः सर्व्वाः केवलं परिचारिका इति एकदा तस्य राज्ञः* काशीश्वरेणसम सन्धौ विघटिते विग्रहावसरो जातः तेनाऽश्वपतिना काशीश्वरेण समयान्तरेऽभियुक्तः स्वकीयानुकूलं वर्षा समयं प्राप्य सज्जितनौकाबलः काशीम्प्रति प्रयाणमुपचक्रमे।

तथाहि। चतुर्व्विधबलो राजा देशेकाले विशिष्यते।
स्वं स्व न्देशञ्च कालञ्च समासाद्य बली भवेत्॥ २॥

भाषानुवाद ॥

गुणाहितउत्तमा। स्वाधीनभर्तृका अभिसरिका उत्कण्ठिता विप्रलब्धा खण्डिता कलहान्तरिता वासकसज्जा वियोगिनी अवस्थाभेदसौं विदग्धा सेराजा दाताअनुरागी सुभगविश्रुतिं हेतु तनिक ग्रामपरिहाससौं मधुरवचनसौं कुटिल भ्रूभङ्गसौं निर्दयकटाक्षसौं गाढ आलिङ्गनसौं सुरत बन्धसौं स्निग्धअधर चुम्बनसौं सम्भोगप्रवृत्ति सबजनि होइति भेली राजाकां परमानन्दपात्र कयल सेपुन राजा ताहि २ तरुणी स्त्रीसौं रममाण तथापि रानी रत्नप्रभाविषय तेहनसद्भाव देखावथि रानीजका जानथि हमहिराजाक प्राणप्रियातदन्या सबकेवल दासी ई एकसमय तेहिराजाकां काशीश्वरक सङ्ग सन्धिनहिरहल कलहक समय संप्राप्तभेल सेअश्वपति काशीश्वर समयान्तरयुद्धसमयक निश्चय राखल परञ्च निजअनुकूल वर्षा समय पाबि सज्जित नौकाबल राजा काशीक प्रति प्रयाण करयितभेला।

चौपाई।

सैन्यचतुर्व्विध नृपबलवान। देशकाल मे होथिप्रधान।
निज निज देश काल कोपाय। बली होथि परिपुरनैं जाय ॥२

* बल्लालसेनपुत्रोऽलक्ष्मणसेन?...

* बल्लालसेनपुत्रोल्लसंकारकोयं प्राचीनपुस्तकेषु व्यवहारपत्रेषु च। विद्यापतिलिखनावल्यां ग्रंथेऽलसंलेख एव सर्व्वत्रास्ति।

ततः प्रयाणावसरे रत्नप्रभया ऽभिहितम् । महिष्युवाच । हे प्रभो त्वं राजा बहुवल्लभः सर्व्वत्रापि सुखभाग्भविष्यसि अहं स्त्री त्वदेकगति स्त्वयि विदेशस्थे सुखरात्रीपर्व्वरात्रिं कथङ्क्षेप्स्यामि तदहमपि सहैव गच्छामि । राजोवाच । प्रिये त्वमेका ममगृहिणी अपराःस्त्रियः पुष्पताम्बूलवत्क्षणमात्रसुखहेतवः ततः त्वमपि मयासह यास्यसि तदा गृहं राज्यञ्च किम्भविष्यति त्वम्मम द्वितीया राज्यलक्ष्मी रिवासि तत स्सचिवै रधिष्ठिताऽत्रैव तिष्ठ तदहमेवागत्य सुखरात्रीपर्व्वणि त्वां सम्भावयामि । देव्युवाच । देव यदिदं वचोव्यभिचरिष्यति तदाहमग्निप्रवेशं करिष्यामि । राजोवाच । न व्यभिचरिष्यति वचः । ततस्स राजा नौकाचामरचुम्बितचन्द्रमण्डलः* केनिपातनिपातावर्त्तितवरुणलोको नौस्थानरवत्रासितभुवनत्रय श्चतुरङ्गबलसहितः प्रयाणं चकार काशीम्प्रति जगाम तत्र च काश्यां काशीश्वरदुर्गं जलचतुर्म्मेखलं नौभिरवरुद्ध्य देवे वर्षति विग्रहव्यसनेन समय ञ्जिनाय युद्धजयाशाव्यासङ्गेन महादेव्यवस्थां विसस्मार समुपस्थिते च सुखरात्रीमहोत्सवे सायङ्काले पौरै

भाषानुवाद ॥

ततय राजाकाँ प्रस्थान समय रत्नप्रभा रानी कहल हेप्रभु अपनैं राजा बहुवल्लभ सर्व्वत्र सुखभागी रहवेकरब हमरस्त्री हमरा केवल एकगति अपनैं अपनैं विदेश रहला सुखरात्रीपर्व्व कोनतरह व्यतीत करब तैं हेतु हमहुँसङ्ग हि जायब राजा कहल । हे प्रिया अहाँ हमर गृहिणी आनजनी पुष्पताम्बूलसभा क्षणमात्र सुखहेतु ततय अहुँउ जौं हमरा संगहि जायब तखन गृह ओराज्य कीहयत अहाँ हमर द्वितीय राज्यलक्ष्मी समाना । ततय मन्त्रीलोकसौं अधिष्ठिता एतहिरहु हमहि आवि सुखरात्रि पर्व्वमें अभिलाषा पूर्णकरब । रानीकहल महाराज अपनैक वचननहि व्यभिचरितहो । से भेला हम अग्निप्रवेश करब । राजा कहल नहि विचलित हयत वचन ततय सेराजाक नौकाक चामरचन्द्र मण्डल चुम्बनकर्ता पतवारनिपात सो आवर्त्तित वरुणलोक नौयान शब्दसौं त्रासित त्रिभुवनचतुरङ्गिणी सेनासमेतयात्रा कयल काशी जायित भेला ताहिकाशीमें काशीश्वरकदुर्ग वारिमेखला वाला नावसौं अवरुद्ध कयल वर्षा होयित युद्धकव्यसनसौं समय विताय युद्धमें जितव एकर व्यासङ्गसौं रानीक व्यवस्था विसरल सम्प्राप्त सुखरात्री महोत्सव सन्ध्यासमय नगर लोक ओ सेनाक लोक

* नौकादण्डःक्षेपणीस्यादरित्रं केनिपातकः इत्यमरः ।

सैनिकैश्च क्रियमाणमाचारपरिप्राप्तलक्ष्मीपूजानन्तर मुल्काभ्रमणा न्दृष्ट्वा परिजनानपृच्छत भोः सुखरात्रीपर्व्वदिनेव तदहं व्यवस्थातः प्रच्युतोऽस्मि देव्यारत्नप्रभया अग्निं प्रविश्य मर्त्तव्यं तदहं किं करवाणि।

यतः। व्यवस्थात प्रच्युतो यस्तु महाकुलसमुद्भवः।
किन्तेन रचितं लोके कृतघ्नेन दुरात्मना ॥ ३ ॥

केवल एव व्यवस्थाभङ्गः पापाय किं पुनः स्त्रीमरणहेतुः। ततो मन्त्रिणः पृच्छामि। राजोवाच। अये मन्त्रिणः श्रूयतामयमयं विवर्त्तः किमत्रोचितंभवति मन्त्रिणऊचुः। देवखेदोन कर्त्तव्यः ॥

राजशक्तेः किम साध्यं प्रचुरदानपरितुष्टैर्नाविकै रद्यामेव रात्रौ नौ र्नेतव्या लक्ष्मणापुरींप्रति ततो देवो नौकया गत्वा परिपालयतु प्रतिज्ञाम् विपक्ष दुर्गावरोधे वयंसर्व्वे तिष्ठाम एव ततस्तथा क्रियमाणे तरणवाहकसहस्रसञ्चिदर्शितवेगमनोरथद्वितीयेन स राजा तस्या एव रात्रेश्चतुर्थयामे लक्ष्मणावतीं प्रतिजगाम वह्निप्रवेशोद्यतप्रेयसीमरणं निवर्त्त

भाषानुवाद ॥

लक्ष्मीपूजोत्तरकरणित उल्काभ्रमण सेदेखि राजापरिजनलोक कोपूछल भोः सुखरात्री पर्व्व आइए अछि हमव्यवस्थाकों बाहरभेलहुँ रानीरत्नप्रभा अग्निप्रवेशकय मरती ततय हमकीकरब हेतु।

चौपाइ।

सत्पुरुषज व्यवस्था त्याग। तनिकर जानव परमअभाग।
लोकविषय रचनाकी करत्। पापी जनक कुपथअनुसरत। ३

केवलव्यवस्था त्यागमें पाप कीपुन स्त्रीकमरण कारण ॥

ततय मन्त्री लोककों प्रश्नव्यथिक। मन्त्री लोककी एतद कर्त्तव्य व्यवस्था विकारणभेल रत्नप्रभा अग्निप्रवेशकय मरती। मन्त्रीलोकउत्तरदेल पृथ्वीनाथ खिन्नछिकर्त्तव्य।

राज शक्तिसों की असाध्य बहुत धन दान परितुष्ट नाविकलोकसों एही रात्रि में नौका आदृत लक्ष्मणापुरी प्रति। ततय अपने नौका द्वारा जाय प्रतिपालनकयल जाय प्रतिज्ञा शत्रु दुर्गक अवरोध में हमरा सबहि रहबे करब ततय तेहने कार्य्य सम्पन्न कन्ता तरुण २ सहस्र कर्णधार सञ्चितप्रवर्त्तणमनोरथक द्वितीय सों से राजातादी रात्रिक चतुर्थ प्रहर में लक्ष्मणा वतीक प्रति आद्रत भेला, अग्नि प्रवेश उद्यता प्राणप्रियाक मरण

यामास महादेवीश्वरागमनं दृष्ट्वा परिचितानुरागा पूर्णमनोरथा सौभाग्यगर्व्विता बभूव श्लोकस्तु ।

आज्ञा यत्र न लङ्घ्यते न विनये वैषम्यमारोप्यते
सद्भावः प्रथमोत्थितो न हृदये ह्रासास्पदं नीयते ।
अन्योन्यं सुखदुःखयोः समतया यद्भुज्यते वैभवं
तत्प्रेम प्रिययोर्मुदे तदितरत्कन्दर्प्पकारागृहम् ॥ ४

इति दक्षिणनायक कथा ।

भाषानुवाद ॥

निवारण कयल से रानी पुन राजा दर्शन सन्ता सत्य अनुराग परिचा सों पूर्णमनोरथा सौभाग्यगर्व्विता भेली ॥

षटपदछन्द ॥

आज्ञा भङ्ग न करय विनय वैषम्य न आवै ।
जेहन प्रथम सद्भाव हृदय मैं ह्रास न पावै ॥
करथि विषय सम्भोग दुःखसुख दुहू समता कय ।
सैह प्रेम प्रिय प्रिया हर्षकारक हो निश्चय ॥
एहि सौं इतिज आन हो दम्पति कों संचार गत ।
कवि पण्डित से कहल भल मदनक कारागार तत ॥४

इति दक्षिणनायक कथा ।

अथविदग्धकथा ॥

विदग्ध सुखभोगार्थी त्रिविधः स्त्रीजनप्रियः ।
निजाः पराश्च सामान्याः स्त्रियोऽपि त्रिविधामताः ॥ १

तथाचभरतः । निजपाणिगृहीतैव लोकद्वयसहायिनी ।
ऐहिकं सुखमाधत्ते स्वर्ग्गञ्चामुष्मिकन्तथा ॥ २
निजस्त्रीगामिनां कष्टं व्रतं जानन्ति कामिनः ।
यावन्नयात्परस्त्रीभि स्तावत्कामसुखं कुतः ॥ ३
सामान्यवनिता वेश्या सा वित्तं परमिच्छति ।
न द्वेषो निर्ग्गुणेऽप्यस्या नानुरागो गुणीन्यपि ॥ ४ ॥

अपिच । ईर्ष्या निजस्त्रीषु न नागराणां निश्शङ्ककेलि र्न्न पराङ्गनासु ।
वेश्यासु चैतद्द्वितयं प्रशस्तं सर्व्वस्वभूतास्त्विमाः स्मरस्य ॥ ५ ॥

भाषानुवाद

अथ विदग्ध कथा ।

सवैयाछन्द ।

नामविदग्ध होथि स्त्रीजनप्रिय तेजनकथि पुनतीनिप्रकार ।
निजा परा सामान्या स्त्रीपुनतीनभेदवति तेव्यवहार ।
पाणिगृहीता अपनहोयिजे तेस्त्रीजनदुइलोकसहाय ।
एतय कामसुखप्रीतय धर्म्मवों अक्षयसुख स्वर्गहुमेंपाय ॥१।२
निजवनिता अनुरागी कनवृत जानथि जेकथि कामीलोक ।
यावत परवनिता सुखलाभन तावत कामक सुखन अरोक ।
धनइच्छा केवल वेश्याकां सुन्दरकी निर्गुण गुणवान ।
छिनक कपट चातुरी कोटिके केवल कामिशिरोमणि जान ॥२।४

चौपाई ॥

निजाङ्गना ईर्ष्यानहि रीति । नहि निश्शंक परस्त्रीप्रीति ।
कन्दर्प्पक सर्व्वस्व तेथीकि नागरकां वेश्या रति नीकि ॥५

बभूव भोजदेवस्य धारानामराजधानी तत्र द्वे वेश्ये निवसतः एका केतकी नाम्नी द्वितीया जातकीनाम्नीति तयो रेकस्यै भुजङ्गो लक्ष पुराणान्येकरात्रिसम्भोगेन ददाति द्वितीयायै पञ्चपुराणानि एकदा तयोः किञ्चिन्निमित्तमासाद्य समुपजाते कलहे केतक्युवाच । अये पापे पञ्चपुराणग्रहणकृतार्थे त्वमपिमया सह स्पर्द्धसे । जातक्युवाच। अयि पापिनि तवैवाहं यमजा भगिनी समगुणा समवयस्का कथं रे त्व मुत्तमासि कथमहमधमा भवामि लक्ष पुराणदानं पञ्चपुराणदानञ्च भुजङ्गानां वैदग्ध्यपराधीनं तत्राहंका यदिच्छसि तदा रूपयौवने नृत्य गीते कामकलासु विशेषं वद कथं त्वत्तोऽहंहीनास्मि ततस्ते द्वे अपि विवद माने विचारार्थिन्यौ राजकुलं गत्वा प्रणम्य राजानमूचतुः । देवकथमि यं पञ्चपुराणभाजना मया सह स्पर्द्धते । जातक्युवाच ॥ देव गुणरूपव योभि र्ममन्यूनतां विचारयतु भवान् पञ्चपुराणदाने भुजङ्गस्य दोषो रा ज्ञश्च । राजोवाच । राज्ञः किं दूषणम् जातक्युवाच । देवे भूमण्डल

भाषानुवाद ॥

भेलि भोजदेवक धारा नामराजधानी ताहिमें दुइ जनि वेश्या वसय् एका केतकी नामकि दोसर जातकीनामकि ताहिमे एकको कामी रसिकपुरुष उपभोगमें एकरात्रिक एक लक्षपलसुवर्ण देथि दोसरको पाचपल सुवर्ण देथि । एक बेरि तनिवेश्या दुहुको कोनहु कारण कलहभेला केतकीकहल रेपापिष्ठा पांच पुराण सुवर्ण सों कृतार्था हमरासो स्पर्द्धा कीकरैछे । सेसुनि जातकीउत्तरदेल अयिपापिनि तोहरे हमजों आँ वहिनि समगुणा समअवस्थावाली कोनाँरे तोउत्तमा कोना हमअधमा । लक्षपलसुवर्ण दान पाँच पलसुवर्ण दानवा वेश्यिकलोकक वैदग्ध्यक पराधीन ततय हमको जों कहैछह तों रूपयौवन नृत्यगीत कामकलाविषय विशेष कहह कोना तोरासों हीनाहम तत से दूहूबहिनि वेश्या विवदमाना उत्तमाधमविचार प्रयोजनवती राजद्वार जाय प्रणामकय राजाका कहल । पृथ्वीनाथ ई किंकरीक ई बाधा कोनतरह ई पांच पल सुवर्ण भागिनी हमरा संगे स्पर्द्धा करैछ । जातकी कहल महाराज ई दासीक ई निवेदन रूपगुण वयससों हमर न्यूनता विचारल जाय अपने । पांच पलसुवर्ण दानमे भुजङ्ग पुरुषदोष की राजाक । राजापुछल रे राजाकको दोष । जातकी उत्तरदेल । अपने पृथिवी मण्डलक शासनकर्त्ता समान गुण में

श्चासति समानगुणयोः फलवैषम्यं राजा च तयोर्गुणरूपवैदग्ध्यवयांसि परीक्ष्य चिन्तयामास अहो महदाश्चर्य्यं सर्व्वथापि समानगुणे समान वयसो कथन्तावत् फलेवैषम्यसम्भवः तदयंनिर्णयो ममशक्त्या नसंभविष्यति राजा विक्रमादित्योविदग्धः अयतेगच्छता मुभेतस्यस्थानं सएव विचारयतु इतिराजाभोज देवस्तेउभेअपिस्त्रियौ राज्ञोविक्रमादित्यस्यस्थानं शुचि पुरुषद्वाराप्रस्थापयामास ॥

राजा विक्रमादित्यस्तुशृङ्गारमण्डपे तयोर्गुणरूपवयांसि परीक्षमाणोऽब्रवीत् यत्केतकीय मात्मानोदुर्ल्लभतान्दर्शयन्ती लक्षभाजनं भवति जातकीलोभातिरेकात्पञ्चभि रेव पुराणैः पुरुषसुलभा सहस्त्रं न लभते कुतोलक्षम् ॥

यतः समानेवहि सामग्री स्त्रीणां रतमहोत्सवे ।
काचिद्विन्दति सौभाग्यं दुर्ल्लभत्वेन कामिनानाम् ॥ ६

जातक्युवाच । देव तथाहमविज्ञा न भदामि किन्तु जानामि कामरहस्यंतथा ॥

भाषानुवाद ॥

फलवैषम्य राजापुन ताहिदुहुवेश्याक गुणरूपवैदग्ध्यवयस परीक्षाकय चिन्ता कयलथा: अतिआश्चर्य्य एवतरहुसौं समानगुणवयसो समग्रीआकोनहेतुसौं फलमे वैषम्य सम्भव ततय हमरशक्तिसौं नहि ईनिर्णय हयत राजाविक्रमादित्य महाविदग्धछथि जो दूनू वहिनि तनिकेस्थान सैंहविचारथु एहि विधिभोजदेव सेदूनूस्त्रीकें राजाविक्रमादित्यकस्थान प्रस्थान पवित्रचतुरपुरुष द्वारा करवाओल ।

राजा विक्रमादित्य पुनशृङ्गार मण्डपमें ताहि दूनू वेश्याक गुणरूप वयसमें परीक्षा करैत कहल ई केतकी अपन दुर्लभता देखवैत लक्षलेवाक प्राप्त होइछ जातकी अति लोभाक्रान्ता पांचहिं पल सुवर्ण सौं पुरुषकों अति सुलभा सहस्रो नहि प्राप्ति करैछ कतय पुन लक्ष ।

सोरठा ।

सव सामग्रि समान सुरतोत्सवमें नारिकों ।
केओ सौभाग्य विधान दुर्लभतें हर रसिक मन ॥ ६ ॥

से सुनि जातकी कहल हे महाराज तेहन हमऽ अविज्ञा नहि किन्तु जनइतछी काम रहस्य ।

दूतीगिरो यत्र न सन्ति वक्राः पदेपदे दुर्लभता न यत्र ।
सिद्धि र्न यस्या निखिलाभतुल्या सा किंरति र्नागरयोः सुखाय ॥ ७

राजोवाच । तर्हिरन्तु ग्राम पुरे प्रकाशतायाँगति । जातश्च वाच । देव प्राक्तनपापेन स्मरार्त्तभरणभूता बहुपुरुषगामिनी वेश्या जातास्मि ततः कामशरपीड़िताश्च पुरुषा स्वपापपरित्यागसाहसेन मां भजन्ते तत्किंप्रकाशनीयम्भवति अधमस्त्रीव्यापारोऽहिसः । राजोवाच । भद्रं ज्ञातो विशेषो युवां गच्छतं स्वं स्वं स्थानं प्रति मयालिखितव्यं भोजदेवेराज्ञि निर्णयस्वरूपमिति गणिकाद्वयं यथैवागतं तथैव पुनः परावृत्य धाराम्प्रति प्रस्थापयामास राजा च स्वयमचिन्तयत् अ हो दुरूहो विशेषो यद्वनयो र्गुणरूपवयसां साम्येपि तत्फलभूते धन लाभे वैषम्यम् । अथवा

काचि द्रव्या वचस्येव काचिद्वस्तुनिकेवलम् ।
वाचि वस्तुनि चाप्यन्या कवितेवहि कामिनी ॥ ८ ॥

भाषानुवाद ।

चौपाइ ।

दूती वचन वक्र नहि जाहि पद पद दुर्लभता नहि ताहि ।
निधि लाभक सुख सन नहि जनिक रतिनागर दम्पति सुख चणिक ॥ ७

राजा कहल तौं रन्ता क भागों प्रकाशता प्राप्ति छो । जातकौ उत्तर देल महाराज पूर्व्व क पापहि सौं कामार्त्तजन भरणा प्राया अनेक पुरुषगामिनी वेश्या उत्पन्ना भेलहु ततय कामशर पीड़ित पुरुषलोक लज्जा शून्यसाहस सौं हमर अनुव्रजन करैछथि ऐ की प्रकाश कर्त्तव्य थीक अधम स्त्रीक ई कार्य्य । राजा कहल नीक ज्ञात भेल विशेष तोंह दुनूजनी जाह अपने स्थान हम लिखबैनि एतद्विषयक विशेषाविशेष भोजदेव राजा कें ई सन्ता जेना अैली दुहु वेश्या तेहिना धारानगरी प्रस्थान कद राजा अपन मनमें विचारल आश्चर्य दुरूह विशेष दुहु वेश्याक गुण रूप अवस्था तुल्य तत्फ लभूत मूल्य लाभ में तुल्य नहि ।

चौपाई ।

केओ रम्या वचनक सन्धान वस्तु सौं केवल रम्या आन ।
केओ वनिता कों दुहू प्रधान रमणी जन कविताक समान ॥ ८ ॥

भवतु गत्वा निरूपयामि पश्चादग्निकोकिलनाम्नो र्वेतालयोः स्कन्धमारुह्य जगाम भोजदेवनगरीम्प्रति तत्र च प्रथमं द्वयोरपि गृहप्रक्रिया न्निरूपयामास । तदेकस्याः पटाम्बराणि अपरस्याः कार्पासानि एकस्या रत्नमयानि भूषणानि अपरस्याः काञ्चनमयानि केवलं एकस्या गृहोपरि कनककलशोऽपरस्यामृत्तिकामयकलश इति परं विशेषः परिपाटिस्समानैव तद्दृष्ट्वा राजाऽचिन्तयत् यदयं धनकृतो विशेषो व्यक्तिगुणदोशनिर्णायको न भवति धनानुरूपा वैचित्री ततो व्यक्तिगुणं निरूपयामि इति भुजङ्गत्वमङ्गीकृत्य लक्षं दत्वा केतकीगृहं जगाम तया सहसम्भोगे क्रियमाणे परस्परानुभावेन प्रेम्णि समुपजाते विक्रमादित्यो मनसैव पपाठ ।

तद्यथा । वेदिन श्रवति यत्र वल्लभे प्रेमकल्पशतजल्पना दपि ।

अर्द्धलोचनतरङ्गिलीलया तान्यवेदि निमिषेण सुभ्रुवा ॥ ८

तत स्सर्वकलाचतुरो विक्रमादित्यश्शिरोव्यथाव्याजेनार्त्तनादं कृत्वा ऽऽकस्माद्भूमौ निपपात केतकी तु तन्तथाविधन्दृष्ट्वा साकूतम

भाषानुवाद ।

हो जाए एकर निरूपण करी पश्चात् अग्निकोकिल नामक वेतालक स्कन्ध चढ़ि जाइ त गेला भोजदेवक नगरी प्रति ततय प्रथम दुनू वेश्याक गृह प्रक्रिया निरूपण कयल एकका पाटम्बर दोसरका कार्पासिक एकका रत्नमय भूषण दोसरका सुवर्णमय एकका गृहक उपर सुवर्ण कलश दोसरका मृत्तिका कलश ईगोट विशेष अन्या परिपाटी समाना से देखि राजा चिन्ता कयल जो ई धनकृत विशेषाविशेष गुणदोषकनिश्चय कारक नहिथिक धनक अनुरूपा वैचित्री तें व्यक्तिक गुण निरूपण करी तदुत्तर वेश्या रसिकक वेषवनि लक्ष दय केतकीक गृह गेला समय अनुसार क्रियारम्भ कयल तनिका सम्भोग सन्ता परस्पर अनुभाव प्रेम उत्पन्न सन्ता विक्रमादित्य मनहि मन पढ़ल ।

दोहा ॥

प्रेम कल्प सत जल्प सौं वल्लभ सुनसान कान ।

नारि कटाक्ष तरङ्गिणी लीलहि पल में जान ॥ ८ ॥

ततय सकल कला निपुण विक्रमादित्य शिरोव्यथा व्याज सौं आर्त्तनादकय भूमिमद खसलाह केतकी पुन तेहन देखि साभिप्राय कहल श्ये नागर ई की विक्रमादित्य प्रते

भाषयत् अये नागर किमिदं विक्रमादित्यः संज्ञां न लेभे केतकीतु तस्य दुःखेन साश्रुनयना शुष्कमुखी क्षणमात्रेण कृशात्कृशतरा बभूव मूर्च्छितो विक्रमादित्यो नेत्रप्रान्तेन तान्तथाविधा न्दृष्ट्वा चिन्तयामास अहो महदाश्चर्य्यं । यतः

धनमात्रक्षिच्चिवेश्या क्षणमात्रपरिग्रहात् ।
प्रियापाणिगृहीतेव खिद्यतीति महाद्भुतम् ॥ १० ॥

पश्चात्कथञ्चित् संज्ञां लब्धा । विक्रमादित्य उवाच । हा हतोऽस्मि शूरस्यापि मम संग्रामे मृत्युरभूत्

नवा तीर्थे वेश्यागृहे मरणमासादयामि । केतकुरुवाच । वल्लभ प्रतिक्रियाच कापिनास्ति । विक्रमादित्यउवाच प्रिये प्रतिक्रिया विद्यते किन्तु तवशक्तेरसाध्या केतकुरुवाच । का प्रतिक्रिया । विक्रमादित्यउवाच महतीयंरुजा प्राणहारिणी पुरापि मम शिरसिभूता गजमुक्ताक्षोदेन वैद्यैः शान्तिन्नीता । केतकुरुवाच । सन्ति ममगजमुक्ताः । विक्रमादित्यउवाच । तास्तु तव सर्व्वस्वरत्नानि वह्नितापे कथं विनाशयितव्यानि

भाषानुवाद ॥

ष्ट । कीतकी तनिका दुःख सौं सजलनयना शुष्कमुखी क्षणमें कृशसौं अतिकृशतरा भय गेलि मूर्छित विक्रमादित्य नेत्रोपान्त सौं देखि चिन्ता कयल आः अत्याश्चर्य्यं ।

चौपाइ ।

क्षण परिचय धन रुचि ई नारि धर्म्मप्रेम की कयल विचारि ।
प्राणि गृहीती सन व्यवहार खिहरि गेलि आश्चर्य्य प्रकार ॥ १० ॥

पश्चात् मूर्च्छा छूटला सौं विक्रमादित्य कहल । हा हम हत भेलहु शूर हमर मृत्यु संग्राम मै होइत ।

नहि तीर्थमें मृत्यु पायोल हा आजहन वेश्या घरमैं मरैछी । कीनकी कहल । वल्लभ कोनो प्रतीकार एतय नहि । विक्रमादित्यकहल अयिप्रिया औषधउपायछैक किन्तु अहांक शक्य नहि कीतकीकहल कीप्रतीकार । विक्रमादित्य कहल महाव्याधि प्राणहारी पूर्व्व हमरामांथमें भेलछल गजमुक्ताक खोद सौं वैद्यलोक शान्तिकयल । कीतकीकहल । अछिहमरा गजमुक्ता । विक्रमादित्यकहल तिसत्रअहांक सर्व्वस्वरत्न थिक अग्नि तापसों

मम विदेशिनः प्राणरचार्थम्। केतक्युवाच। आः प्रियमैवं वक्तव्यं चण मावन्तराहं प्रिया वृतास्मि प्रियाजनोचितं प्राणदानम्प्रियप्राणरचार्थ मिदन्तु धनं किं वस्तु अतस्तयागजमुक्ताफलानिगृहादानीय कोल फलानीव खिन्नानि खिन्नगजमुक्ताफलकोषपोट्टलकेन छेदं लब्धा विक्रमादित्यो निरुग्बभूव साच केतकी निर्विषादं पूर्व्ववदेवकेलिप्रवृत्ता ताम्बूलकर्पूरदानेन तं संभाषयामास सोपिचिन्तितवान्। यदयथा।

मम हृदयविषादाद्खेदभारं वहन्ती
मयि मुदितमुखेतु प्रेचते जातहर्षा।
सदृशितसुखदुःखा नागरीयं प्रिदेश
प्रतिफलितमिवाखा: प्रेमदेहे विभाति ॥ ११ ॥

ततो विक्रमादित्यः कृतार्थितकामस्तु प्रत्यूषसमये पूर्व्वदिशमरुणा न्दृष्ट्वा बहिर्न्निश्चक्राम तं दिवसं क्वापि नीत्वा तत्रैव प्रदोषवेलायां

भाषानुवाद॥

कोन अर्थंजे नष्टकरब हमरविदेशिकप्राणरचार्थ। केतकीकहलखा: एहननहि वक्तव्यचण माव अपनैक हमप्रिया वृत्तिछी प्रियाजनकां उचित प्राण दान प्रियप्राण रचानिमित्त ई तों धनकी वस्तुथीक। सेपुन गजमुक्ता घरसों आनि वदरकफल समान तुछमनमानि तप्रगजमुक्ताफलक उपा पोटरीक खेद पावि विक्रमादित्य नीरोग होइतभेला से केतकी निर्व्विषाद जेहनहोतिहन पूर्व्व करीति केलि प्रवृत्ताभेली ताम्बूल कर्प्पूरदानसों अति प्रयपादर कयल सेहोराजा चिन्ताकरयितभेला।

चौपाई।

हृदयक हमर विषादकभार। वहन करयि गृहिणीव्यवहार।
हमर मुदित मनहुनि मनहर्ष। देखथि नयन सुधारस वर्ष।
सुख दुख संगिनि नागरिसङ्ग। प्रेमप्रफलितहिनकार अंग।
वेश्या जनि उत्तमा स्वभाव। कयलनि तेहन जेहन प्रस्ताव॥११

तत्य विक्रमादित्य कृतार्थितकाम प्रातःकालहि पूर्व्व दिश अरुणा देखि बहरएलाह सेदिनकतहु विताय ताहीदिनकसन्ध्यासमय पांच पण सुवर्ण दय जातकीक गृह व्यवहार

पञ्चपुराणानि दत्वा जातकीगृहमगात् तत्रापि लब्धसम्भोगः काष्ठ वत्कठिनां रममाणामपि प्रेमहीनां दृष्ट्वा राजा मुक्ताहारं तस्याः कण्ठादाकर्ष छिन्नेगुणे मुक्ताफलानि शय्यायां विकीर्णानि तद्दृष्ट्वा विस्मृतकेलिरभसा जातकी मुक्ताचयनपरायणा रमणविमुखी मुक्ता फलानि वर्त्तुलीकृत्य गणयाञ्चकार गणयित्वा धृत्वा च यावत् पुनः परिहासमिच्छति तावद्भूपालो वहिर्निश्चक्राम निर्गत श्चिन्तयामास। तद्यथा। रसच्छत्वं ज्ञातं रमणरभसावेशविगमा

न्महेच्छत्वं मुक्ताफलगणनया व्यक्त मभवत्।
निराकूतै स्सर्व्वैः सुरतविधिभिः प्रेम विदितं
विधाता वेश्याया व्यरचि हृदयं वज्रकठिनम् ॥ १२ ॥

तदियं जातकी वेश्या धनमात्ररुचिः केतकीतूत्तमस्त्रीत्यभिधाय स्वराज्यङ्गत्वा भोजदेवे तथा लिखित्वा केतक्यै गजमुक्तातुलासहस्रं प्रस्थापयामास राजा विक्रमादित्य स्साम्प्रत मपि।

भाषानुवाद ॥

पाञ्चदभेला ततऽ प्राप्तसम्भोग सन्तारममाणा काष्ठकठिन हृदया प्रेमरहिता जातकी कैं देखि राजा तनिकण्ठ सौं मोतिकहार विहारव्यापार सौं तोड़ल त्रुटितमुक्ताहारसुक्ता फल शय्या भरि छिड़िआएल।

सेदेखि क्रीडा त्यागि सेजातकी मुक्तासंग्रहण व्यापारासक्ता रसिकरमणसौं विमुखा मुक्ता सब एकत्रकय गनिकैं धयल यावतपुन परिहासक इच्छा करथि तावत राजा बाहर निर्गत चिन्ता करयितभेला सेजे छन।

सोरठा।

रसप्रकृत भेल ज्ञान रमण रभस घावेशविनु।
महेछ छ अनुमान मुक्ताफल परिगण नसौं ।१२
जानल प्रेम विधान भावरहित रतिविधि सकल।
हृदयकि वज्रसमान वेश्या कां विधि विरचलनि ॥१२

ई जातकीवेश्या धनमात्र रुचि केतकी तौं उत्तमस्त्री ईकहि अपन राज्यजाय भोज देवकां लेहन लिखल केतकी कां गजमुक्ता सहस्रतुला पठवायल राजा विक्रमादित्यसम एखनहुछथि।

वागर्थवत्यः कवितास्समस्तास्सर्व्वा युवत्यस्तनकेशवत्यः ।
तासाम्पुनः कापि कलावती या तां वेत्ति राजा शिवसिंहदेवः ॥ १३

इति विदग्धकथा ।

अथधूर्त्तकथा ।

रतार्थी भजतेधूर्त्तः सिद्धिकार्य्ये विरज्यते ।
न कस्याश्चित्प्रियो धूर्त्तः काचिद्धूर्त्तस्य न प्रिया ॥ १
सर्वां रक्तस्य धूर्त्तस्य वक्रकौतुकमोहिताः ।
हसन्तिच रमन्तेच विश्वसन्ति नचाङ्गनाः ॥ २ ॥
कुलटायाः कुमित्रस्य कुप्रभोः कितवस्य च ।
विद्युल्लेखासमा प्रीतिस्सद्योजाता विलीयते ॥ ३ ॥

बभूव पाटलिपुत्रन्नामनगरन्तत्र खङ्गसर्व्वस्वो नाम राजपुत्रो वसति सचैकदा युवतीन्निजपत्नीं नाभिगृह्यात् स्वगृहं नयन् पथि प्रान्तरे

भाषानुवाद ॥

वचन अर्थयुत कविता ढेरि । स्तनकचवती युवति कति फेरि ।
तनिकरकलाकुशल मतिजान । सेनृपवर शिवसिंहमहान् ॥१३

इतिविदग्धकथा ।

अथधूर्त्तकथा ।

चौपाई ।

सम्भोगार्थी अति अनुकूल । सिद्धि कार्य्य तस्करसम तूल ।
धूर्त्त नककरो प्रियथिक रीति । धूर्त्त क्रमे नहिनारि सप्रीति ॥ १
सभा अनुरक्त धूर्त्तछल हारि । कौतुक कुटिल मोहिता नारि ।
क्रीडङ्ग हसथि न कर विस्वास । बहुत कुलीना मन होत्रास ॥२
कुलटा नारि कुमित्र कुभूप । तेहने धूर्त्त कुभव एक रूप ॥
प्रेम तनिक हो तडित समान । तत्क्षण नाश हेतु नहिजान ॥३

छल पटना नगर ततय खड्गसर्व्वस्व नामराजपुत्र वसथि सेएकसमय युवती अपन स्त्रीकें नैहरसौं अपन गृहलय अवइतपथ प्रांतरमें धूर्त्तपथी देखल सेधूर्त्त तनिका स्त्रीमें

र्शशिना*धूर्त्तेन दृष्टः स धूर्त्तस्तस्य कलत्रे साभिलाषो बभूव प्रावृत्य प्रियसखे निरन्तरचित्ते मूलदेवे निवेदयामास सखे मूलदेव अद्यैका राजपुत्री दूरगमनपरिश्रान्तामत्तगजगामिनी मुक्ताफलैः पूजितच न्द्रमण्डलमिव श्रमजलविन्दुभिरलंकृतं मुखं दधाना पत्युः पश्चाद्गच्छ न्ती मया दृष्टा । तद्यथा ।

तस्यां काञ्चनवञ्चनक्षमतनौ तारुण्यभारालसं
गच्छन्त्यां गजराजविभ्रमकला जातादृशो गोचरम् ।
पश्यन्त्यान्तु मृगीदृशि स्मरशरव्यापारलीलावला
दग्रे धावति दुग्धसिन्धुलहरी पश्चाच्च हालाहलम् ॥ ४ ॥

भाषानुवाद ।

साभिलाष भेल धुरिकेँ प्रियमित्रनिरन्तरचित्त मूलदेवकाँ कहल है मित्रमूलदेव आज हम एक राजपुत्री दूरगमनपरिश्रान्ता मत्तगजगामिनी श्रमजलविन्दुसौँ अलंकृत मुखमण्डल जे छन मोतीअनेक सौँ पूजित चन्द्रमण्डल ,, लिखल अछिकविविद्यापतिनिज तीर कृतिगीतावलीमै ,, वदन सोहागल श्रमजलविन्दु । मदन मोति दयपूजल इन्दु ,, एहन शोभायमानमुखश्रीमती स्वामिकपाछु जाइति हमदेखल ।

चौपाइ ॥

कञ्चन वञ्चन कुशल सुअङ्ग । आलस भरल तरुणाता सङ्ग ।
गमनैं जितल मत्त गजराज । लोचन देखि हरिणि मनलाज ।
स्मर शर लीला नव व्यापार । उमकर मन मृगचपल उदार ।
आगाँ दुग्ध समुद्र तरङ्ग । पाछाँ धाव हलाहल रङ्ग ॥२

* मिथिलायां भरौडातप्पान्तर्गतधर्मपुरग्रामे औरतप्पान्तर्गततरडीहाग्रामेच धूर्त्तो वसन्नासीत् अभिधा डीह इति तत्प्रसिद्ध एवमूलदेवस्तु मिथिलायांविस्मालायांबेसारेति पुरिवासीत् । संप्रति लोके बेसारा इतिख्यातिः । तारडीहाग्रामनिकटेतु, नन्दोर ननौर इति, तत्र बहवोवंचका आसन्निति वृद्धा वदन्ति ॥

तत्क्षणादारभ्य मम हृदयं तत्समागमोत्कण्ठं भूतमस्ति कथं न्नि र्व्वहतीति सर्व्वकलाचतुर कथयोपायञ्चोपेत्कन्दर्पबाणवेदनाविह्वले न मया प्राणाः परित्यक्तव्यास्त्वयाच सुहृद्विपत्ति र्द्रष्टव्या। तथाहि।

असन्तुष्टस्य धूर्त्तस्य धावतश्च परात्परम्।
स्त्रीसङ्गमसहस्रेण कामे नास्ति कृतार्थता॥ ५॥

मूलदेव उवाच। सखे चिन्ता न कर्त्तव्या भविष्यत्युपायः ब्रूहि येन राजपुत्रदम्पती यास्यतस्तत्पन्थानं जानासि। शश्युवाच। जानामि तौ पृष्टौ मया। मूलदेव उवाच। तर्हि सावधान एवासि गच्छ तावत्सत्वरं तस्यैव पथः कियत्यपि दूरे निर्ज्जनप्रदेशे वस्त्रगृहं कृत्वा स्त्रीवेषधारी तिष्ठ अहमप्यागच्छामि शशिना तथा कृते मूलदेव स्तन्निकटवटच्छायायां कृत्रिमचिन्तानम्रानन स्तस्थौ पश्चात्परिश्रान्तायाः प्रियायाः परिश्रमविनोदानुरोधेन मन्थरगामी सोऽपि राजपुत्रः प्रियासहितस्तत्रैवाऽऽगामवटवृक्षच्छायायामुपविष्टो मूलदेवं चिन्तापरं दृष्ट्वाऽवादीत्। राजपुत्र

भाषानुवाद।

ताही क्षणसौं हमर हृदय तनिकसमागमहेतु उत्कण्ठित अछि कोनतरहसौं निवहत हेमित्रसकलकलाचतुरकहु उपाय नहितौं कामबाण वेदनासौं विह्वलहम प्राण त्यागब अहांमित्र विपत्ति आंखि देखब।

दोहा।

असन्तुष्ट अति धूर्त्त मन आन आनमें धाव।
स्त्रीसहस्र सम्भोग सौं काममें तृप्तिन आव॥४

मूलदेवकहल मित्रचिन्ता नहि कर्त्तव्य कहजै राजपुत्र युवायुवती जायितअछि सेहम वाटबुझी। शशीकहल जानल हम दुहुव्यक्ति कांपुछल। मूलदेव कहल तौं सावधानेकौ जाउ तावत् शीघ्र ताहि वाटकौं कतोक दूर निर्जन देशमें वस्त्रकुटी बनाय स्त्रीवेषसौं रहजय हमहु आएब शशी तेहन सब वृत्तकयल पथपरिश्रान्ता स्त्रीक श्रमनिवारणार्थ मन्थरगमत सेराजपुत्र स्त्रीसहित ताहि स्थल सम्प्राप्त भेलाह वटकछायामें बैसला सन्ता मूलदेवकां चिन्तितदेखि पुछलराजपुत्र अहाँ महाशय कौहेतु उद्विग्न मनअपने कदेखला

उवाच। अयेमहाजन कथमुद्विग्नो दृश्यते। मूलदेवउवाच॥ राजपुत्र स्वकीयोद्वेगकथां परमलज्जाकरीं भवतो मान्यस्याग्रे किं कथयामि अस्ति किं यदि न कथयामि तदा प्रतिक्रिया कथं भविष्यति परेषां विपत्प्रतीकारकर्त्तारस्सन्त एव सम्भवन्ति नहि महत्तरादितरे परोपकाररसिकाः। राजपुत्रउवाच। किमिदानीं भवतः प्रतिकर्त्तव्य मस्ति। मूलदेवउवाच। पश्यतु भवान् वस्त्रकुटीम्। राजपुत्रउवाच। दृष्टा वस्त्रकुटी किन्त्वत्र विद्यते मूलदेवस्सलज्जवदनमवोचत् भोः कारुणिकमूर्द्धन्य शृणु तावत् विवर्त्तं सम्प्रति मम पत्नी गर्भवती गृहंच्च नः लक्ष्मीशून्यंप्रसवकर्म्म स्त्रीजनाधिष्ठानसाध्यमित्यादि दृष्ट्वा मया परामृष्टं यदीमां पितृगृहन्नयामि तत्र गत्वा स्वकीयमातुरवेक्षायाम्प्रसूयतामिति नाभिगृहन्नीयमाना मम पत्नी सादुर्दैवभावादिहैव प्रान्तरे प्रसववेदनापराभूता हाहतास्मीत्यभिधायरुदन् भूमौ निपपात तन्तथाविधन्दृष्ट्वा सराजपुत्रस्समुपजातकरुणो बभाषे अये महाजन न भेतव्यं भवता यदियं मम पत्नी राजपुत्री तां गत्वा पश्यतु प्रतिकरोतुच स्त्रीप्रस

भाषानुवाद

जाइछ। मूलदेवकहल। राजपुत्र अपन उद्वेगकथा परमलज्जाकरी अपनैं मान्यक आगा कीकह छथिकी जौं नहि कहब तखन प्रतीकार कोना होयतगय। परविपत्ति उद्धारकर्त्ता सज्जन केवल होथि नहि महोत्तमविना अन्य परोपकाररसिक। राजपुत्रकहल। कीसंप्रति अपनेंक प्रतिकर्त्तव्य अछि सेकह। मूलदेवकहल। देखलजाय वस्त्रकुटी। राजपुत्रकहल। देखलतौं वस्त्रकुटी कीताहिमें अछि। मूलदेव सलज्जमुख कहल। हेकरुणाशील शिरोमणि शुनु तावत् वृत्तान्त संप्रति हमरस्त्री गर्भवती गृहमें स्नेहवाली तेहन लोकनहि प्रसवकर्म्म स्त्रीलोक सहायता साध्य थिक इत्यादि देखि हम विचार कयल जौं हिनका बापक घरमैं लय जाइ ततय जाय अपन मायक अवेक्षा विषय प्रसवहोयितनि सेनीक तैं हिनका नैहर लयचललहुँ हमरस्त्री दुर्दैवशसौं एहना प्रान्तर में प्रसववेदना सौं महादुःखमैं पड़लि हाथि ईश्वहि कनयित भूमिमैं खसला तनिका तथाविध देखि राजपुत्र सकरुण कहल अहो महान नहिभय कर्त्तव्य जैं ईहमर स्त्री राजकन्या तनिका चीतय जाय देखथु करथु परिचर्य्या स्त्रीक प्रसव परिपाटी स्त्री सेह

वपरिपाटीं स्त्रिय एव जानन्ति। मूलदेवउवाच। तथा भवतु ततः पत्यु राज्ञया राजपुत्री वस्त्रकुटीं प्रविवेश धूर्त्तेन प्राप्य गाढमालिङ्गिता रतिप्रवृत्ता बभूव यतः॥

यदा कामयते नारी पुंभिस्सह समागमम्।
गौरीशापप्रभावेण पुरुषेच्छामपेक्षते ॥ ५

अपिच। षण्मासः कामसम्मोहाद्रमन्ते विरमन्तिच।
स्त्रियो न विरमन्त्येव तासामष्टगुणः स्मरः ॥ ६

मूलदेवस्तु राजपुत्रेण समं सरसाः कथास्सरसञ्च पद्यं प्रस्तोतुमारेभे।

सघर्म्मसलिलाननं सुपरिभूतपीनस्तनं
सगद्गदमृदुस्वरं स्मितनिरस्तलज्जाभरम्।
चलन्मुखरमेखलं दरनिमीलितप्रेक्षणं
रहोमदनदैवतं सुचिरमस्तु यूनोर्म्मुदे ॥ ७ ॥

भाषानुवाद ॥

जानथि। मूलदेवकहल। तैहनेञो ततय स्वामीक आज्ञा पावि सेराजपुत्री वस्त्रकुटीप्रवेश कयल ताहि धूर्त्त सौं आलिङ्गिता रतिप्रवृत्ता भेली॥

सोरठा।

गौरी शापप्रभाव सदा सकामा नारिहो।
पुरुष अपेक्षा पाव पुरुष समागम रमित मन ॥५

दोहा।

पुरुष काम सम्मोहसौं सुरत विरति को पाव।
सुरत विरक्ता नारि नहि वसुगुण मदन प्रभाव ॥६

मूलदेव पुन राजपुत्र सङ्ग सरस सरसा कथा औ सरस २ श्लोकक प्रस्ताव कयल।

दोधकछन्द।

घामक जल आनन परि पूरित गद्गद स्वर स्मितहासे।
पीनस्तन मर्द्दन परिभवसह रहलनलाज विलासे॥
कलरव मेखल संचल छलरति रतिपति दैवत काजे।
अर्द्धनिमीलित नयन रहे चिरदम्पति अति मुदमाजे ॥७

अनेन श्लोकेन कर्णपथगतेन वस्त्रकुटीवलयादिझणत्कारं राजपुत्रो नाकलयाञ्चकार शशीतु द्विगुणितभावोदयो बभूव पश्चात्पूर्णमनोरथेन शशिना निर्म्माल्यमालेव परित्यक्ता केशान् संयम्य वस्त्रं परिधाय वस्त्रकुटीबहिर्भवन्ती चिन्तयामास अहो धुर्त्तयोः कौटिल्यमिति स्वामिना राजपुत्रेण पृष्टा। राजपुत्र उवाच। अयेप्रिये कथय प्रसूतायाः पुत्रो जातः पुत्रीवेति राजपुत्री लज्जया हसन्तीव नम्रानना बभूव। मूलदेव उवाच। राजपुत्र का प्रश्नापेक्षा हास्येनैव लक्ष्यते पुत्रोजातः।

तथाहि। कूटोपायप्रवीणस्य हासभूयिष्टकर्म्मणः।
लेशेनाऽपिन धूर्त्तस्य लज्जा भवति मानसे ॥ ८ ॥

तत स्सर्व्वे स्वं स्वं स्थानं जग्मुः। श्लोकस्तु

दूत्या नात्मवशीकृतागुणवती न प्रीणिता चाटुभि
स्सौन्दर्य्यप्रतिमेव मन्मथकृता नाभ्यर्च्चिता काञ्चनैः।

भाषानुवाद॥

एहि पद्यकर्ण गतसौं वस्त्रकुटी वलयादि झणत्कार राजपुत्र नहि शुनथि शशी पुन द्विगुणित भावोदय भेला पश्चात पुर्णमनोरथशशीसौं निर्म्माल्य माला समाना त्यागलि भेलि केशबांधि वस्त्रपहिरि वस्त्रकुटीसौं बहरयिलो चिन्ताकयल आश्चर्य्य दूनू धूर्त्तक कुटिलता स्वामिनिकट गेली स्वामीराजपुत्रपुछल अयि प्रसूताका पुत्रभेल कीपुत्रीक जन्मभेल राजपुत्रीलज्जासौं हसैत नम्रमुखीहोइत भेली मूलदेव कहल॥ राजपुत्र प्रश्नाक की अपेक्षा हासहिसौं अनुमान होइछ पुत्रकजन्म भेल अछि।

चौपाइ।

कूटउपाय कुशल अतिहास। धुर्त्तक मन नहि लाजनिवास।
छलक हेतुकर स्वाङ्गअनेक। धर्म्मकर्म्म मे रहित विवेक॥८

ततय सब अपन अपन स्थान जाइतभेला।

चौपाइ॥

वशीकरण नहि दूती द्वार। गुणवतिमे नप्रणय व्यवहार।
कंचन द्वयनहि सेवा कयल। अर्त्त महाद्भुत मतिका धयल।

उत्तुङ्गस्तनभारमन्थरगतिः श्रान्ता च दूराध्वनो ।
धूर्त्तेनाङ्गुलबुद्धिना परवधूर्व्याजोपभुक्ता हठात् ॥ ८

इतिधूर्त्तकथा ।

अथ घस्मरकथा ।

तद्यथा । अपि शूरश्चविद्योऽपि सुबुद्धिरपि पूरुषः ।
भ्रूभङ्गशृङ्खलाबद्धः स्त्रीवश्यो घस्मरो भवेत् ॥ १ ॥

अस्ति भागीरथीतीरे कान्यकुब्ज नामनगरं तत्र काशीश्वरजयचन्द्रो नाम राजा बभूव स च कृतदिग्विजयस्समुद्रान्तकरग्रहणकृतार्थः शुभदेव्या महिष्या सह समुपजातस्नेहपरवशः शृङ्गारी राज्यसुखमनुभवति । तथाहि

तावदेव मतिः पुंसां नीतिमार्गानुसारिणी ।
यावत्कटाक्षविक्षेपलक्षो न स्यान्मृगीदृशाम् ॥ २ ॥

भाषानुवाद ॥

दूरपथश्रमें श्रान्ता नारि । मन्दगमनि रमणी कनिहारि ।
आनक नारि भोगकर धूर्त्त । तरुणी जनें मनोरथ पूर्त्त ॥८

इतिधूर्त्त कथा ।

अथघस्मरकथा ।

दोहा ।

शूर सविद्य सुबुद्धि जो पुरुष नाम सवठाम ।
भ्रुकुटि शृङ्खलाबद्धसों स्त्रीजित घस्मर नाम ॥ १

अछिभागीरथी तीरमें कान्य कुब्ज नाम नगर ताहिमें काशीश्वर जयचन्द्र नामक राजा छीयितभेलाह सेदिग्विजयकर्त्ता समुद्रान्त करग्रहणकृतार्थ शुभदेवी नामक रानी कस्नेहपरवश शृङ्गारी राज्य सुख करयित भेला ।

चरिपद ।

नीति मार्ग्ग अनुसारिणि मतिरह पुरुषसिंहकाँ तावत् ।
मगनेआक कटाक्षक्षेपण लक्षाहोथि नहि यावत् ॥२

अन्यच्च । अपि शास्त्रविदो धीराश्शुद्धास्संसारनिस्पृहाः ।
रामाकटाक्षसम्पर्कात्केन स्युः स्मरकिंकराः ॥ ३ ॥

पश्चात् कदापि योगिनीपुरादागत्य चतुरङ्गबलसहितो यवनेश्वरः सहावदीनो नाम जयचन्द्रमभियुंक्ते वारंवारञ्चोभयबलसंहारसारन्नृत्यत्कबन्धभूतवेतालं युद्धं भवति वारम्वारञ्च यवनेश्वरः पराजयी पलायते एवं बहुविधयुद्धविजयिनि जयचन्द्रे जाताहंकारे पराजयिनि यवनेश्वरे मानभङ्गमलिने परमगहनं वैरमुत्पन्नं ततो यवनेश्वरश्चिन्तयामास स यदयं जयचन्द्रोराजायुद्धे बलेन पराभवितुन्न शक्यते ततो यदि भवति तदात्र बुद्धिं व्यापारयामि तथाहि ॥

युद्धे पराजयी राजा दुर्ब्बलो बलिनोऽप्यरेः ।
*निकृष्टार्थान् प्रयुंजान स्सेनाभेदं समाचरेत् ॥ ४

तावदरिबलवार्त्ता ज्ञातव्याभवति तथाहि ॥

भाषानुवाद ॥

चौपाइ ।

शास्त्री पण्डित शुद्धाचार । स्पृहा रहित बहुपुन संसार ।
स्त्री कटाक्षजों तनिकञ्जलाग । स्मरकिंकर त्याजितमर्य्याद ॥३

पश्चात् योगिनीपुरसों आबि चतुरङ्ग सेनासहित यवनेश्वर सहावदीन जयचन्द्र राजासों युद्धआरम्भ कयल जाहि युद्धमें वारंवार दुहूदल बलकसंहार नर्तित अनेककबन्ध भूतवेताल वारंवार यवनेश्वर पराजय पावि पलायित होथि एनतरह अनेकप्रकार युद्धमें जयचन्द्रराजा विजयप्राप्त प्राप्ताहंकार भन्ता श्री पराजय प्राप्त यवनेश्वर मानभङ्ग मलिनमन्ता उत्कट वैरवाढल ततय यवनेश्वर विचारल ई जयचन्द्र युद्धमे सेनासाहित्यसों नहि पराजय पावि सकैछथि ततयजों बुद्धिकव्यापार विस्तारकरी ।

चौपाइ ।

प्रबल शत्रुसों यद्यपि हारि । निर्ब्बल करथि उपाय विचारि ।
सेनाभेदक उचित उपाय । वित्तव्यय हो अरिपुर जाय ॥४

तावत् शत्रुबल वार्त्ता जानल जाय हेतु ।

---

* कर्त्तव्यकुशलान् ।

राजमन्त्रेषु सर्व्वेषु वार्त्ताज्ञानं प्रशस्यते ।
नह्यविज्ञाततत्वानां मन्त्रः फलति कुत्रचित् ॥ ५

ततो जयचन्द्रराज्ये कः प्रयोजक इति ज्ञातुं युज्यते नह्यप्रयोजकानां सन्धानेन भेदेन वा किञ्चिदस्ति फलमिति । यवनेश्वरेण प्रहितचरेणागत्य कथितम् । चरउवाच । यवनेश्वर सम्प्रति राज्ञो जयचन्द्रस्य महती सेना बहूनि धनानितीक्ष्णतराबुद्धिरनुरक्ताश्च प्रकृतयः । यवनेश्वरउवाच । राज्ये तन्त्रताकस्य । चरउवाच । विद्याधरमहत्तकस्य शुभदेव्या महिष्याश्च । यवनेश्वरउवाच । महिषीवचनं शृणोति राजा । चरउवाच । शृणोतिकृतेनलङ्घयति । यवनेश्वरउवाच स्त्रीवश्यश्चेत्तर्हि मम हस्ते पतितो वराकः क्व यास्यति तदिदानीन्तामेव स्त्रियं वशमानयामि साच मम सुखग्राह्याभविष्यति यतः ॥

कल्लोलवेगभ्रमविभ्रमाद्यैरापस्तरुण्यश्चसमस्वभावा ।
उच्चैर्न्न गच्छन्त्यपि नीयमाना धावन्ति नीचैःपदमक्रमेण ॥ ६

भाषानुवाद ॥

दोहा ।

नृपतिक मन्त्र समस्तमें वार्त्ताज्ञान प्रधान ।
अबुतत्व अज्ञात कां फलित न मन्त्र महान ॥ ५

ततय जयचन्द्र राजाक राज्यमें केप्रधान से जानक चाही नहि अप्रयोजक लोकक सन्धिओ भेदविना फल । यवनेश्वरक प्रेषितदूत आविकहल हेयवनेश्वर संप्रतिजयचन्द्र कांबहुत धनअतितीक्ष्णबुद्धि अनुरक्तप्रजा । यवनेश्वर पुछल । राज्यमेंककर मुख्यता दूतकहल । विद्याधर मन्त्रीक औशुभदेवी रानीक यवनेश्वर पुछल रानीककथा सुनै छथि राजा, दूतकहल सुनैछथि करैछथि एको कथाक नहिलङ्घन करैछथि । यवनेश्वर कहल । स्त्रीकवश्यछथि तौं हमरा हाथ में अस्माप्तभेलाह वेचारे कतय जयताह तौं सम्प्रति सेह स्त्रीकां वशीभूता कै अनावी सेहमर सुखग्राह्या हयतीगय । हेतु ।

उपजाति छन्द ।

कल्लोल वेगभ्रम विभ्रमादि नदीसुभावा तरुणी अवश्या ।
विनाश्रमैं नीचपथानुगामि नउच्चमें जायि अनेकयत्नै ॥ ६

अपिच । व्यामोहभूयिष्टरसप्रगल्भा कामस्य मोहस्य च वासभूमिः ।
दङ्मात्रदृष्टिःपरबुद्धिवश्या प्रोत्साहिता किन्नकरोति नारी ॥७

अन्यच्च । चमत्कारिषु चित्रेषु भूषणेष्वम्बरेषुच ।
लोभो भवति नारीणां फलेषु कुसुमेषुच ॥ ८

किन्तु विद्याधरस्तु मन्त्री साधिकारो विद्यते तेन कार्य्यमिदं सविघ्नं लक्ष्यतेतथाऽपि यत्नं करवाणि असाध्यबुद्ध्या न परिक्रियते कार्य्यकलापः विधाता परमानुकूलो दृश्यते ॥

यतः । धाता नीतिज्ञकार्य्येषु सारिक्रीडासु पासकः ।
सौभाग्येषु प्रियः स्त्रीणामनुकूलः प्रतिचरते ॥ ९ ॥

ततो ब्राह्मणस्य सर्व्वत्र प्रवेश इति चतुर्व्वेदिनं सर्व्वभाषाचतुरं चतुर्भुजनामानं ब्राह्मणमाहूयादिदेश चतुर्भुज दशलक्षाणि धनानि

भाषानुवाद ॥

दोहा ।

व्यामोहयं बाहुल्य रस अधिक प्रगल्भा नारि ।
कामक मोहक वास अछि सबदिश देखनि हारि ॥६
परबुद्धिक वश्या सदा पावथि जौं प्रोत्साह ।
कौन करथि नारी ततय देखथि सुख निर्व्वाह ७
चमत्कारयुत चित्रमें भूषण अम्बर देख ।
नारी मन अति लोभक्षो फूलक्ष फलक्ष विशेष ॥ ८

किन्तुविद्या धरमन्त्री अधिकारीछथि तें परकार्य्य ई विघ्न सहित देखला जाइछ तथापियत्नकरबे करब असाध्यबुद्धिसों नहि हरण हो कार्य्य समूह विधाता अतिअनुकूल देखैछी ।

दोहा

विधि नितिज्ञक काजमें चौपड़िमें पुनपास ।
तेहन स्त्रीसौभाग्यमें प्रिय अनुकूल विलास ॥ ९

ततय ब्राह्मणकां सबस्थल प्रवेश ई हेतु चतुर्वेदी चतुर्भुज नामक ब्राह्मणकां बजाय आज्ञादेल अहां चतुर्भुज लक्षरुपैया लोय जाउ कान्यकुब्जनगर ततय निवासकय

त्वं गृहाण गच्छ कान्यकुब्जनगरम्प्रति तत्र स्थित्वाऽस्मद्धनव्ययेन स्वकीयचातुर्य्येण शुभदेवीं मम वशमानय सिद्धे कार्य्ये कृतार्थं त्वां करिष्यामि। चतुर्भुज उवाच। यथा प्रभोराज्ञास्ति तथा करिष्यामि फलसिद्धिस्तु प्रभोरेव प्रतापात्सम्भाव्यते किन्तु धनानि बहूनि कथन्तत्र नेतव्यानि। यवनेश्वर उवाच। प्रत्येकं लक्षं लक्षं कृत्वा दशवणिजो दशलक्षाणि वसूनि नयन्तु वणिज्याक्रयविक्रयव्याजेन तत्र गत्वा तिष्ठन्तु तवाज्ञाकारिणः त्वञ्च भिक्षुकमुद्रया राजकुलं गत्वा साधय मे कार्य्यम् पश्चात्तथा संभृतिसमुदाये समुपजाते ब्राह्मणस्तु तन्नगरङ्गत्वा राज्ञो जयचन्द्रस्य दर्शनञ्चकार बहुविधोपगमेन प्रत्यासत्तिम्प्राप्य राजदेवार्चनकाले वेदपाठङ्करोति क्रमेण महादेवीदर्शनञ्चकार महादेवीतु तस्य ब्राह्मणस्य प्रियम्वदतया परितुष्टा नाना कथाः पृच्छति प्रत्यहं स कथयति समयक्रमेण समुपजातायां प्रत्यासत्तौ सदवसरं प्राप्य ब्राह्मणः कथयामास। ब्राह्मणउवाच। देवि धरावलये त्वमेकैव धन्यासि यतो यवनेश्वरः सहावदीनस्त्वां प्रस्तौति शुभदेव्युवाच। आः कथं यवनेश्वरो मां जानाति।

भाषानुवाद ॥

हमर धनखर्चसो अपन चातुरी सों शुभदेवी कॉं वशकाउ सिद्धिकार्य्य सन्ता अहाँ कों हम कृतार्थ करब चतुर्भुज ब्राह्मण कहल जेहन प्रभुक आज्ञा अछि तेहने करब फलसिद्धि पुन प्रभुप्रतापहि सों संभावित होयत किन्तु बहुत धन कोनतरह ओतय लयजाएब यवनेश्वर कहल। दशवणिक् प्रत्येकर लाख लाख रूपैया लयजाय वाणिज्य क्रय विक्रयक छलसों ततय जाय रहय गय अहाँ पुन भिक्षुक वेषसों राजनगर जाय साधन करू हमर कार्य्य पश्चात तेहनसकल संघटन सम्पन्नसन्ता विश्वास पावि राजाक देवार्चन समय वेद पाठ करथि क्रमहि महादेवीक दर्शन जायल रानीपुनतेहि ब्राह्मणक प्रियवचनतासों परितुष्टा नाना कथा पुछथि प्रतिदिन सेकहथि समयक क्रमसों अतिशय विश्वास सन्ता उत्तम अवसर पावि ब्राह्मण कहल अयिमहारानी पृथ्वी मण्डलमें अपनेहि एकधन्या थिकहु जै कारण यवनेश्वर सहावद्दिन अपनेक स्तुति करैछथि। रानी कहल आ कोना यवनेश्वर हमराजनैछथि। ब्राह्मणकहल। अपनैकांजनैछथि

ब्राह्मणउवाच । देवि त्वां जानाति तव वैदग्ध्यञ्च जानाति किन्त्वपरा कथा विद्यते तान्निवेदने बिभेमि । महिष्युवाच । न भेतव्यं कां कथां कथय पश्चात्कथाश्रवणे तां साभिलाषां ज्ञात्वा ब्राह्मणः कथयामास । देवि एकदा वज्ररत्नमयी मुद्रात्युत्तमा यवनेश्वरेण प्राप्ता तां प्राप्य यवनेश्वरो वदति यदियं मुद्रा धात्रा मह्यं ददौ न प्रिया यस्मै चेदं वस्तु दीयते सा च जयचन्द्राय ददौ शुभदेवी अहो पुण्यं जयचन्द्रस्येति यदि देवी न कुप्यति तदा तां मुद्रामानीयार्प्पयामि । देव्युवाच । किं फलं मुद्रार्प्पणस्य । ब्राह्मण उवाच । योग्यसमागमः केवलं यदियं देव्या एवाङ्गुलीयोग्येति मुद्रां समर्प्पितवान् । देवी च मुद्राग्रहणकाले परदृष्टिमसहमानां परमतुष्टां दृष्ट्वा चिन्तयामास । अहो लब्धास्मि फलितं श्रमेण तदनन्तरं वस्तुषु पुनः पुनर्दीयमानेषु स्नेहदार्ढ्ये समुपजाते ब्राह्मणो महिषीमुपदिदेश देवि त्वमस्य राज्ञः पट्टमहिषी प्रेमपात्रमसि त्वयि विद्यमानायां तव पिता भ्रातरश्च राज्ये न गण्यन्ते विद्याधरः केवलं सर्व्वाधिकारी सकलां राज्यलक्ष्मीं खादति किन्तव सौभाग्येन ।

भाषानुवाद ॥

अपनैकविदग्धता सेहो जानैतछैनि किन्तु अन्य कथा छल सेकहबामें त्रासहोइछ । रानी कहल । नहित्रास कोनकथा सेकहु पश्चात् रानीकां सेकथाश्रवणमें अभिलाषा देखि ब्राह्मणकहल । अयिमहारानी । एकसमय यवनेश्वर वज्रतररत्नमयिमुद्रिकाअत्युत्तमा पाओल सेप्राप्तिसन्ता यवनेश्वरकां अश्रुपातभेल हेतु ई अंउठी विधाता देलहमरा परन्तु तेहनस्त्री नहिदेल जनिकांएहनवस्तु दितहु । सेपुनजयचन्द्रकां देल शुभदेवी आश्चर्य पुण्यजयचन्द्रकजे । अपनै क्रोधनहि करबजायतौं सेअंउठी आनिअर्प्पणकरी । रानीकहलकोफल अंउठी अर्प्पणक ब्राह्मण कहल योग्यसमागममात्र जे ई शुभदेवीक अङ्गुलीयोग्य थिक ईकहि सेअंगुठी अर्प्पणकयल रानीपुन अंगुठी ग्रहणसमय अन्यपुरुष दृष्टि असहमाना रानीकां तथाविधा देखि चिन्ताकयल श्रमकफल लाभभेल तदन्तर अनेक वस्तु दयित २ स्नेह दृढ़भेलता ब्राह्मण रानीका उपदेशदेल अयेमहारानी अपनैएहि राजाक पटमहिषी प्रेमपात्र थिकहु अपनहिक अछैत अपनैक पिता ओभ्राता लोक राज्यमें अगण्य जकां रहैछथि विद्याधरमन्त्री सर्व्वाधिकारी सकलराज्यलक्ष्मीफलभोगी

मन्त्रिण्युवाच । किमहङ्करिष्यामि । ब्राह्मणउवाच । राजा तव वश्यस्तव शक्त्या किमिदानीं कृतन्न सम्भवति शृणु तावत् यत्करिष्यसि ।

सर्व्वेषु राजायस्थानेषु द्विगुणं द्विगुणं देयंस्वीकृत्य निजपक्षपातिनः पितृकुलजानधिकारिणः कुरु द्वित्रिचतुष्ष्वायस्थानेषु द्विगुणं धनम्प्राप्य राजा तव वचसि विश्वासं करिष्यति धनन्तु मयादेयं यवनेश्वरप्रसादेन धनस्य का दरिद्रता ततो धनलाभलुब्धानुभावेन राज्ञा विद्याधरस्तेयी ज्ञातव्यः च्युताधिकारः कर्त्तव्यः राज्ये सर्व्वत्र तवैवाधिकारी भविता कोशोत्कर्षप्रयोजना हि कार्य्याधिकारिणो धनानुरागदृष्टयो हि राजानः ततो राज्ये करतलमागते यत्कर्त्तव्यन्तत्सुखेन भविष्यति मन्त्रिण्या तासु तासु क्रियासु कृतासु तदेव फलं लब्धं ब्राह्मणवचने प्रीतिर्भूता राजश्यालकादय स्सर्व्वे मन्त्रिणीपक्षपातिनोऽधिकारिणो बभूवुः मन्त्रिविद्याधरेऽविश्वासोजातः देवी च ब्राह्मणवचनेन यवनेश्वराभिलाषिणी बभूव इति वार्त्तां ब्राह्मणप्रहितदूतद्वारा श्रुत्वा यवनेश्वरोऽपि सकलबलसहितस्सन्निधानमाजगाम राज्ये परमानर्थबीजं पतितं

भाषानुवाद ॥

तयि कौ अपनेक सौभाग्यासौं रानी कहल । कोन्हमकरब । ब्राह्मणकहल राजा अपनैक वशीभूत अपकनेँ शक्ति सौं कोन सम्प्रति कृत संभव शुनलजाय जे अपने कयलजायत ।

सबआयस्थानमेँ द्विगुण २ देय स्वीकार कय अपन अपेक्षित नैहरक भातृवर्गंकाँ राज्यमैँ अधिकारी कयलजाय दुइतीनि लाभ स्थानविषय द्विगुणधनपावि राजा अपनैक वचनमैँ विश्वास करताह धनतौँ हमहि देब यवनेश्वरक प्रसादसौँ धनकको दरिद्रता ततय धनलाभ लोभसौँ राजा विद्याधरमन्त्री काँ चोर जानि अधिकार रहित करताहे सेहन्ता राज्य विषय सर्व्वत्र अपनेहिक अधिकार हयत कार्य्यकर्त्ता राजाकाँ सेहु जे धन कोषक वृद्धिकरय धनअनुरागी दृष्टि राजा होइछथि ततय राज्य हाथ अयलासौँ जे कर्त्तव्य हयत सेसुखहिसम्पन्न हयत रानी पुनसे क्रिया कयलासौँ सैहफलपावोल ब्राह्मणक वचनमेँ प्रीतिवाढल राजाक सार आदि अधिकारवान रानीक पक्षपाती होइतभेला मन्त्री विद्याधरमेँ अविश्वासभेल रानी ब्राह्मणक वचनसौँ यवनेश्वरक अभिलाषिणी होइति भेली ईवार्त्ता यवनेश्वर काँ ब्राह्मण प्रेषित दूतद्वाराभेल सैयवनेश्वर सकलसेना सहित जयचन्द्रराज राजधानी निकट संप्राप्तभेला राज्यमेँ तौँ अनर्थ बीजबाजोगभेल

विद्याधरस्तु जानन्नपि राज्ञे न कथयति यदि कथयति तदा राजा न प्रत्येति यवनेश्वरस्तु चतुर्भुजक्रियायां परीक्षार्थं परमविश्वासपात्रं 'अलपासेनावरनामानं यवनं प्रस्थापयामास स यवनो भिक्षुकवेशधारी हट्टमध्ये मेषन्नर्त्तयन् राजकुलागच्छता मन्त्रिविद्याधरेण दृष्टश्चोपलक्षितश्च पद्यं विस्तीर्णललाटपट्टो रक्तायताक्षलोचनो महाभुजो महापुरुषलक्षणधारी भिक्षुको न भवति यवनः तदेनं छागनृत्यव्याजेन स्वकीयमागारन्नीत्वा निरूपयामि पश्चात्तथा कृत्वा रहसि तं पप्रच्छ। विद्याधर उवाच। हे यवन त्वं कोऽसि। यवन उवाच। भिक्षुकोऽहं। विद्याधर उवाच। मैवं ब्रूहि सत्यं कथय माच भैषीः साधुसमागमेकुतो भयं ममाग्रे वागनृता न लभते पदं त्वं अलपासेनावरोऽसि। यवन उवाच। कथं ज्ञायते मन्त्रिविद्याधरश्चित्रपटं दर्शयामास यवनसचिव पश्येदं तव राज्यस्य सर्व्वे प्रकृतिपुरुषा अत्र लिखिता सन्ति तन्मात्मानमपि पश्य तद्दृष्ट्वा निरुत्तर साश्चर्य्यश्च यवनोऽब्रवीत् साधुमन्त्रिराज समयकृत्ये सावधान एवाऽसि तथापि तवस्वामी राजा जयचन्द्रो

भाषानुवाद।

विद्याधरमन्त्री जनितहु वृत्तान्त राजाकां नहि कहिअकथि कहबोकरथि तौं एकोकथाक राजाविश्वास नहिकरथि यवनेश्वर पुन चतुर्भुज ब्राह्मणक क्रिया परीक्षार्थ परमविश्वास पात्र अलपासेनावर नामकयवनकां पठाओलसे यवनपुन भिक्षुक वेशधारी मदारी छलसो हाटमें भेंड़नृत्य करवैतकें विद्याधरमन्त्री राजकुलसौं अबैत देखल ओ तकां कहल जो ई विस्तारभाल रक्तनेत्र महाबाहु महापुरुष लक्षणलक्षित भिक्षुक नहि थिकाथि यवन ईकेओ थिकाह तें इनक कपटछागनृत्य देखबाकछल सों अपन गृह लेआनि कोई व्यक्ति से निरूपणकरी पश्चात् तेहनकय एकान्त में तनिकां विद्याधरमन्त्रीपुछल।

हेयवन की अहांकनाम। यवनकहल हमभिक्षुक। विद्याधरकहल एहन कहइजनु हमरा सत्य२ कहु भयनहि कर्त्तव्य साधुसमागममें कतय हमरा आगां मिथ्यावचन स्थानकयपबैछ अहां अलपासेनावर थिकहु यवनकहल कोनतरहजानल विद्याधर चित्रपटदेखाय देल ओ कहल हे यवनमन्त्री देखू ई अहांक समस्तराज्यभरिक स्त्रीपुरुष चित्रपटमें लिखितअछि अपनें अपनें ताहिमें देखू। सेदेखि निरुत्तरआश्चर्य्य मानि यवनकहल साधुमन्त्रिराज साधु समय कृत्यमें सावधान अहां छी तथापि अहांक

राज्यच्युतो भवन्नस्ति विद्याधरउवाच ॥ मम वचनन्न शृणोति यवनउवाच। तर्हि मूढः विद्याधरउवाच। सहि सर्वकलाचतुरस्स्वामिगुणोपेतोऽपि स्त्रीवश्यः प्रमादयति। यवनउवाच। तर्हि सुतरां मूढः स्वामिन्यप्रतीतिभाजि किं कर्त्तव्यमन्त्रिणा ॥ तथाहि।

प्रभुश्चेत्त्यक्तविश्वासः प्रतिकूलैरधिष्ठितः।
तस्मै हितोपदेशेन स्वाहितं परिशङ्क्यते ॥ ७ ॥

ततो यदि भवान् मन्यते तदा भवन्तं यवनराजसन्निधानन्नयामि भवते राज्यन्दापयामि विद्याधरः कर्णौपिधाय आः शान्तं पापं मित्र पुनरेतादृशन्न वक्तव्यं परलोकस्पृहाः स्वामिविपक्षं न भजन्ते नवा विपदि प्रभुन्त्यजन्ति वरञ्चात्मानं घातयन्ति। यवनउवाच। मन्त्रिराज त्वमिदानीं मां शत्रुपक्षपातिनं ज्ञात्वाऽपत्रनिष्टेन योजयसि तदस्योपकारस्य निःक्रयः कथं मया कर्त्तव्यः। विद्याधरउवाच। किन्त्वनिष्टेन जयचन्द्रस्य हितं करिष्यामि तवानिष्टमुपकारनिःक्रयेप्यस्ति प्रकारः

भाषानुवाद।

स्वामी राजाजयचन्द्र राज्यसों बाहर होमय परछथि। विद्याधरकहल हमरकथा नहि मानैछथि। यवनकहल तों मूढ थिकथि। विद्याधर कहल सकलकलाकुशल स्वामिगुणसम्पन्न हमर स्वामी स्त्रीवश्य सन्ता प्रमादमें पडल छथि। यवन कहल तखनतों मूढ छुओं मूढ थिकथि स्वामीअप्रतीतिमान सन्ता मन्त्रीकी करत।

चौपाइ।

हित उपदेश करय जों जाथि। प्रतिकूलकवश नहिपतियाथि।
इनिप्रभुकां कहजेंहितजानि शंकित अपनो सयते हानि ॥७

ततय अहांकां जों नीकबुझना जायतों यवनेश्वर निकट अहांकां हमलदजाइ ओ अहदूकां ईराज्यदियायदी। विद्याधरमन्त्री मूनि करैं कान मूनि पुनकहल आः शान्त पाप हेमित्र पुन एहन नहि कहक परलोकक स्पृहावान पुरुष स्वामीक विरोधिका सेवानहि करैछ विपतिमें नहि स्वामीकां तेजैछ वरआत्मघातकी मरैछ। यवन कहल। मन्त्रिराज अहां एहिसमय अनुपक्षपाती जानिपुन हमराअनिष्टमें योजितनहिकारैकी एकरउपकार वदलाप्रत्युपकार कोनतरह हमकरव। विद्याधरकहल। कीअहांक अनिष्टसों जयचन्द्रक हितकरव अहांक अनिष्ट उपकारक वदलामें प्रकार अछि दुर्ग अवरोध समय हमदहिना

दुर्गावरोधसमये मया दुर्गस्य दक्षिणद्वारे स्थातव्यं सन्ति ममानुरक्ताः पञ्चशतान्यश्ववारास्तैः समेतोऽहं विरक्तोऽपि स्वामिनो भक्तिमुद्दिश्य युद्धं करिष्यामि। यदि तत्र सुरत्राणो मम साक्षात् परिपन्थी भवति। तदाहं परिपन्थिमहत्त्वेन युद्धे यशोमहत्त्वं प्राप्नोमि तथा स्वीकृत्य गते यवनसचिवे विद्याधरो मन्त्री वंशस्थितिरक्षार्थं पुत्रं दुर्गाद्बहिः प्राहिणोत् स्वयञ्च स्वकीयानुरक्तैः पञ्चभिः शतैरश्ववारैः सहितः शस्त्रपाणिर्दुर्गावरोधसमये दक्षिणद्वारमलङ्कार वृत्तेच परसैन्यदर्शने सुरत्राणे सम्मुखे भगवति सूर्य्ये पश्यति परबलं प्रविश्य खड्गघातघोरं संग्राममकरोत् बहून् परपक्षसुभटान् हत्वा बाणव्रणविह्वलं पुष्पितं किंशुकतरुमिव कलेवरं त्यक्त्वा विद्याधरो मन्त्री सूर्य्यमण्डलभेदी बभूव शोणितं तस्य विपक्षैर्वन्दितं सुरत्राणेन दुर्गं गृहीतः राज्यमाक्रान्तं कोषः प्राप्तः सुभटाः सत्कृताः। जयचन्द्रो राजा न प्राप्तः क्वगतः किं भूतः केन व्यापादितो वेति किमपि न ज्ञातं महिषी शुभदेवी सुरत्राणेनानीय पृष्टा अये त्वं जयचन्द्रस्य को दृशी स्त्री तयोक्तं पाणिगृहीता प्रेयसी च।

भाषानुवाद ॥

द्वारमें रहब अछिहमर अनुरक्त पांचशय अश्ववार तेहि समेत हम विरक्तो स्वामिक भक्तिउद्देश कय युद्धकरब जौं ततय सुलतान साक्षात विरोधीहयता। तखन हम परिपन्थी महत्त्वसौं युद्धमें यशोमहत्त्वकां प्राप्तिहयत तेहन अङ्गीकार कय गेला सन्ता यवनक मन्त्री। विद्याधर वंशरक्षार्थ पुत्रकां दुर्गसौं बाहर करवाय अन्यस्थान कयदेल अपने पुन अपन अनुरक्त पांचशय घोडाकसवारसहित शस्त्रधारी किला अवरोध समय दक्षिणद्वार युद्धार्थी भेलाह सन्नद्धसैन्य सम्मुख सुलतान भगवान सूर्य्यनारायण कें देखयित शत्रु सैन्य में जाय तरवारिक आघात घोर युद्ध करयित भेलाह बहुत शत्रु सुभटकां काटि काटि बाण घात विह्वल पुष्पित पलाश तरुसमान शरीर त्यागि विद्याधर मन्त्री सूर्य्यमण्डलभेदी होइतभेलाह शोणित तनिक विपक्षवर्गसौं वन्दितभेल सुलतान किलाप्रवेश कयस्वाधीन कयल राज्यलेल सर्व्वस्वरत्नादि सहित कोषागार ग्रहण कयल सुभट लोकक सत्कार कयल जयचन्द्र राजाकां नहिंपाओल कतयगेला कीभेला ककरासौं कतयमारलगेला वाकिछो किछु केओनहि जानल। रानी शुभदेवीकें सुलतानअनायपुछल थिकि अहां कोनप्रकारक जयचन्द्रक स्त्री। सेकहल विधिसौं विवाहिता ओ प्राणप्रिया।

ततः सुरत्राणेनोक्तं अये पापे स्वामिद्रोहकारिणि त्वन्तस्य परिणीता प्रियोपचारसुखिनी न भूताऽसि कथं मम भविष्यसीत्यभिधाय गात्राणि तस्याः खण्डं खण्डं कृत्वा दिक्षु निःक्षिप्तानि पठितञ्च ।

सुखोपकरणान्नारी प्रेम तस्यां प्रियोचितम् ।
वध्यताच निषिद्धैव स्त्रीवध्यो याति दुर्गतिम् ॥ ८ ॥

इति चक्कारकथा ।

भाषानुवाद ॥

ततय सुलतान कहल अयि पापशीला स्वामिद्रोहकारिणी तनिक करगृहीता प्रिय उपचार सुखिनी नहि भेलौं कोना हमर हयबह इकहि शरीर तनिक खण्ड खण्ड कय दिश दिश निःक्षिप्तकयश्लोकपढ़ल ।

चौपाइ ।

सुखउपकरण सतत चिक्किनारि । प्रेमस्वामियाँउचितविचारि ।
चिक्कनिषिद्ध वध्यता रहस्स । दुर्गति पावथि स्त्रीहों बध्य ॥८

इति चक्कार कथा ।

अथ मोक्षकथा--तावत्प्रस्तूयते ।

मोक्षन्तावद्वदन्त्येके नित्यात्यन्तसुखोदयं ।
दुःखाभावं परे ब्रूयुर्म्मुमुक्षुर्व्यस्तमिच्छति ॥ १ ॥
काश्यान्तनुपरित्यागात्साक्षात्कारेणचात्मनः ।
भक्त्या त्रैलोक्यनाथस्य मोक्षस्सिद्ध्यति तद्विदाम् ॥ २ ॥

केचित्तत्वज्ञानमेव मोक्षधर्म्मं वदन्ति काशीमरणशिवभक्तिप्रभृतिभिस्तत्वज्ञानम्मन्यते तत्वज्ञानद्वारा मोक्षः साध्यतइति विशेषः तस्मात्तत्वज्ञानिकथाप्रारभ्यते । तेच त्रिविधाः । तद्यथा ।

निर्व्वन्धो निस्पृहश्चैव लब्धसिद्धिस्तथैवच ।
मोक्ष एक विधः प्रोक्तस्त्रिविधास्तु मुमुक्षवः ॥ ३ ॥

तेषु निर्व्वन्धो यथा ॥

भाषानुवाद

अथमोक्षकथा ।

दोहा ।

अतिशय सुखक उदय जनय नित्य मोक्षसे नाम ।
केओ कह दुःखाभाव थिक द्रुढ मुमुक्षु सठाम ॥ १
काशी त्याग शरीर सौं आत्मा साक्षात्कार ।
परमेश्वरक सुभक्ति सौं मुक्तिक सिद्धि प्रकार ॥ २

केओपुन तत्वज्ञाने मोक्षधर्म्म कहैछथि काशी मरण शिवभक्ति प्रभृतिसौं तत्वज्ञाने मानैछथि तैं हेतु पुन हम तत्वज्ञानीक कथारम्भ करैछी से तीनिप्रकार निर्व्वन्धो १ निस्पृह २ लब्धसिद्धि ३ ।

दोहा ।

निर्व्वन्धो निस्पृह तथा लब्ध सिद्धि तदान् ।
एक प्रकारक मोक्ष छी त्रिविध मुमुक्षु प्रधान ॥ ३

ताहिमे निर्व्वन्धो लेखन ।

एषणानां परित्यागाद्गुरुवाक्यपरिग्रहात् ।
निर्ब्बन्धात्तत्वबोधस्य निर्ब्बन्धीमुनिरुच्यते ॥ ४ ॥

बभूव द्वारकायां शुद्धाशयो नाम ब्राह्मणः तस्य विवेकशर्म्मा पुत्रो जातः सच जातमात्रएव शैशवादारभ्य पूर्व्वजन्मसंस्कारेण संसार चरितमस्थिरम्मनुते । तथाहि ॥

अस्ति गृद्ध्रशिशुर्म्मांसं तृणञ्च मृगशावकः ।
पोतः प्राक्तनसंस्काराद्दुग्धं पिवति मानवः ॥ ५ ॥

पश्चाद्विद्याभ्यासेन शैशव व्विनाय प्राप्तयौवनोऽप्युदासीनस्तत्वज्ञानं याचमानः पितरं पप्रच्छ । पुत्रउवाच । पितरहं तत्वज्ञानार्थी तत्व ज्ञानविदं कञ्चिदुपजीवितुमिच्छामि नहि गुरुचरणानुग्रहेण विना तत्वज्ञान लाभस्सम्भवति भवांश्च मत्पिता तत्वविच्च शास्त्रदृष्टिस्ततो भवन्त मेवोपजीवामि यतः ।

भाषानुवाद ॥

सोरठा ।

सकल दुराशा त्याग गुरुक वचन परिग्रहण सों ।
तत्वबोध अनुराग निर्व्वन्धी मुनिसैथिकथि ॥ ४

रहथिद्वारकामे शुद्धाशय नामक ब्राह्मण तनिका विवेकशर्म्मापुत्र भेलथिन सेपुनउत्पन्न मात्र बालयावस्थहिसों पूर्व्व जन्मक संस्कार सों संसार चरित्रको अस्थिर मानथि ।

चौपाइ ।

गिद्धक बच्चा खायिक मांस । हरिनक बच्चा खायिकघास ।
नरशिशुको पूर्व्वक संस्कार । करथिनिराकुल दूधअहार ॥५

पश्चात् शिशुता विताय समर्थ संता उदासीन तत्वज्ञानार्थी तत्वज्ञानक लाभार्थपिताको पुछल । पिता हम तत्वज्ञानार्थी तत्वज्ञानवेत्ता पावि कोनहु तरहसों समीचीन जीव नरहो नहिगुरु चरणअनुग्रहविना तत्व ज्ञानक लाभसंभव अपनैहमर पिता तत्व वेत्ता शास्त्र दृष्टि ततय अपनेहिसों तत्वज्ञान जानक इच्छा अछि ।

गृहस्थितायां विद्यायां विद्यार्थी नदिशो व्रजेत्
मूले लब्धफलः कोवा प्रारोहति तरोः शिरः ॥ ६ ॥

